वर्षम् - ७१
संयुक्ताङ्कः : - ११-१२
आश्विनमासः
विक्रमाब्दः २०७८
युगाब्दः ५१२३
सित.-अक्टू., २०२१

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख

प्रत्यब्दं नवरात्रेषु दुर्गापूजा विधीयते।
पूजनं नवदुर्गाणां क्रियते च सभक्तिकम्।



## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | श्रीकृष्णाष्टकम् | प्रो. ताराशंकरशर्मा पाण्डेयः | ६ |
| ३ | काव्यशास्त्रग्रन्थेषु रसविवेकः | डॉ. कृष्णकुमारकुमावतः | ७ |
| ४ | व्यासस्य ज्ञानसन्देशः सर्वलोकहितावहः | पं. नथमलशास्त्री | १३ |
| ५ | अष्टाङ्गयोगे यमनियमानुपालने वितर्काः ......... | डॉ. उषाकिरणयादवः | १५ |
| ६ | एकाकिनः शिशोः बालगीतम् | डॉ. हर्षदेवमाधवः | १८ |
| ७ | ज्योतिषशास्त्रे वृष्टिस्वरूपम् | रणसिंहजाटः शोधच्छात्रः | १९ |
| ८ | संस्कृतसप्ताहः | डॉ. सोहन लाल मीना | २३ |
| ९ | पुस्तक समीक्षा | म.म. देवर्षिकलानाथशास्त्री | २५ |
| १० | संस्कृतसमाचाराः | प्रबन्धसम्पादकः | २७ |
| ११ | नारीस्तम्भः | डॉ. राजेश्वरी भट्ट | २८ |
| १२ | पाठक प्रतिक्रिया | पं. नथमलशास्त्री दाधीचः | ३० |
| १३ | आयुर्वेदस्तम्भः | प्रो. वैद्यः बनवारीलालगौडः | ३१ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
महन्तः प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 71 अङ्कः -11-12
भाद्रपद-आश्विनमासौ
विक्रमाब्दः 2078
युगाब्दः 5123
सितम्बर-अक्टूबर, 2021

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# अफगान-सङ्कटो महती समस्या

...✍ प्रोफेसर श्रीकृष्णशर्मा

2001 खिष्टाब्दे अमेरिकादेशे 9/11 इति प्रसिद्धनाम्ना आतङ्की आक्रमणानन्तरं राष्ट्रपतिः **जार्ज बुश** महोदय आतङ्कसमाप्तये अफगानिस्तानदेशे समारूढां तालिबान-सत्ताम् अपदस्थामकरोत्। अलकायदासंघटनमेतदर्थं लक्ष्ययासीद् यतोऽलकायदाप्रमुख **ओसामा बिन लादेनः** 9/11 घटनायाः प्रमुखः षड्यन्त्रकर्ता मन्यते स्म। डेमोक्रेटिकदलस्य राष्ट्रपतेः **'बराका-ओबामा'** इत्यस्य शासनकाले 2011 तमे वर्षे 'ओसामा बिन लादेनः' मृत्युं गतः। तदनन्तरं 'डॉनल्ड ट्रम्प' कालः समागतः परं समस्या नोपहता। अफगानिस्तानदेशे शान्तिः नैव स्थापिता। अमेरिकादेशीयाः सर्वेऽपि सर्वकाराः अफगानिस्तानस्य वास्तविकसमस्याम् अनवगमय्य मिथ्याभाषणमेव जनतायाः समक्षमकुर्वन्। ते जानन्ति स्म यदिदं युद्धं नैव जेतुं शक्यम्। अत एव डॉनल्ड ट्रम्पसर्वकारः अफगानिस्तानदेशात् स्वसैन्यबलम-पसारितुं निश्चयमकरोत। 31/8/2021 दिनांकं यावत् अमेरिकासैन्यबलम् अपाकरिष्यत इति। रूपान्तरेणेदं कथयितुं शक्यते यदमेरिकादेशः आतङ्कवादिनां समक्षम् अवानंसीत्।

अधुना **जो-बाईडेनः** अमेरिका-राष्ट्रपतिः। स तु एतावतया शीघ्रतायामासीद् यत् निर्धारितदिनाङ्कात्पूर्वमेव अफगानिस्तानदेशमत्यजत् मानवाधिकारहननसदृश विकटपरिस्थितिष्वपि। अद्यत्वे खलु अफगानिस्तानदेशः क्षत-विक्षतः। समा महाशक्तयो मौनमाश्रिताः। शक्तिसम्पन्नदेशाः स्व-स्व-हानिलाभौ विचारयन्ति। वस्तुतस्तु द्वितीयविश्वयुद्धानन्तरमेव विश्वं जगत् महाशक्तीनां स्वार्थपञ्जरे निबद्धम्। सर्वतः प्राक् वैभवमीहमानो ब्रितानी साम्राज्यवादः, तदनन्तरं छद्म साम्यवादं प्रदर्शन् सोवियतसंघः, ततोऽप्यनन्तरं लोकतन्त्रस्य आपाततो मनोहारि स्वरूपं प्रस्तुवन् अमेरिकानीत-राष्ट्रसंघअफगानदेशम् अस्तव्यस्तमे-वाकुर्वन्।

अफगानिस्तानस्य अपदस्थो राष्ट्रपतिः **अशरफ-गनीमहोदयो** भीतभीतः सन् स्वदेशं पर्यत्यजत्। यद्यपि तदनन्तरं तत्रत्य उपराष्ट्रपतिः **अमरुल्लाह सालेहः** आत्मानं कार्यवाहकराष्ट्रपतिम् उदघोषयत्। पंजशीरप्रान्तस्य पर्वतीयस्थानेषु तालिबानस्य प्रतिरोधं कर्तुं अमरुल्लाह महता प्रयासेन चेष्टितवान्। पंजशीर एव अभेद्यं तत्स्थानम् अस्ति यत्र तालिबानस्य कदापि जयो नाभवत्। पंजशीरस्य **सिंहोऽहमदमसूदो** रक्षामन्त्री **बिस्मिल्लाह-मोहम्मदी** च तालिबानं प्रतिरोद्धुं अमरुल्लाहसालेहं प्राणपणेन समर्थितवन्तौ।

हा हन्त! पाकिस्तानस्य गुप्तचरसंस्थाप्रमुखस्तत्र गत्वा Air Strike द्वारा साहाय्यं विधाय तालिबानस्य तत्र पंजशीरे सुकरं प्रवेशं अकारयत्। कस्यापि देशस्यान्यस्मिन् एतादृशमाचरणं संयुक्तराष्ट्रसंघस्य नियमेभ्यो विपरीतम्, मानवाधिकाराणामपि हननमासीत्। पंजशीरप्रमुखः वारं वारम् महाशक्तिभ्यः किञ्च शक्तिसम्पन्नदेशेभ्यः साहाय्यं याचितवान्, परं न कोऽपि तं श्रुतवान्।

अमेरिका-राष्ट्रपतिः 'जो-बाईडेन' कथयति- 'अस्माभिः स्वीयं भाविजीवनं निर्माणाय अफगान देशवासिभ्यः प्रचुरोऽवसरः प्रदत्तः परन्ते समर्था नाभवन् इति। परं नैतत् समीचीनम्। यतोऽफगानिस्तानस्य समृद्धयेऽमेरिकादेशस्य विंशतिः वर्षाः नैव पर्याप्ताः। इतोऽप्यधिकः कालस्तत्रापेक्षित आसीत्। उत्तरकोरिया-देशात् दक्षिणकोरियासंरक्षणप्रदाने सप्ततिः (70) वर्षाणि व्यतीतानि, इदानीमपि अमेरिकादेशस्य 20000 सैनिकास्तत्र दक्षिणकोरियासुरक्षार्थं प्रतिबद्धाः सन्ति। एवमेव अफगानिस्तानदेशस्य कृतेऽपि महाशक्तेराचरणं यद्यभविष्यत् सुष्ठुरभविष्यत् अधुना तु तत्र जनतायाः सर्वम् अप्रियमेव जातम्।

भारतदेशस्य कृतेऽनेन महान् संकटः समुत्पन्नः। अफगानिस्ताने तालिबानस्य वर्चस्वम् पाकिस्तानस्थ-आतंकिसंघटनानि शक्तिसम्पन्नानि भविष्यन्ति। लश्कर-ए-तैयबा, जैश-ए-मोहम्मदसदृशेभ्य आतंकि संघटनेभ्य आर्थिक-प्रोत्साहनं प्रदास्यते येनैतेषामातंकिनां दुरुपयोगो भारतराष्ट्रस्य विरोधे सम्भवः।

अधुना 'अफगानिस्तान' देशस्य नाम- **'इस्लामिक अमीरात ऑफ अफगानिस्तान'** इत्येवमुद्घुष्टं तालिबानसर्वकारेण। यद्यपि तालिबानसर्वकारप्रवक्ता कथयति यद् 'वयं शान्त्या विधिसम्मतं शासनं स्थापयितुं कामयामहे' इति। परन्तु तेषां मनस्यन्यद् वचस्यन्यद् कर्मण्यन्यदेवानुभूयते।

पाकिस्तानमग्रे कृत्वा चीनदेशस्तत्र यत् क्रीडितुमीहते तत् सर्वे जानन्त्येव। अतो महाशक्तिभिः किं वा शक्तिशालिराष्ट्रैरेतद्विषये विचिन्त्य निर्णेतव्यम्।

**सम्पादकः**

**व्याकरणपीठाध्यक्षचरः**

**जगद्गुरु-रामानन्दाचार्य-**

**राजस्थान संस्कृतविश्वविद्यालयः, जयपुरम्**

**दूरभाषाङ्कः 8386943655**

**त्रुटिसंशोधनम्** - 'भारती' पत्रिकायाः पूर्ववर्तिनि 10 तमे अंके सम्पादकीये 15 तमायां पंक्तौ 1938 इत्यस्य स्थाने 1838 इति पठनीयम्।

# श्रीकृष्णाष्टकम्

❑ प्रो. ताराशंकरशर्मा पाण्डेयः

### ▲ कोऽपि वंशीमनोज्ञः ▲

श्रीराधापादयुग्मामलकमलरतः प्रेमभावाभिभूतो
नोधाभक्तौ निमग्नो भ्रमरसुचरिति-धर्मशुद्धिं दधानः।
धर्मे चार्थे च कामे सकलविधियुते शिक्षयन्नात्मवृत्तिं
लोकोद्धाराय जातः सुजनहितकरः
कोऽपि वंशीमनोज्ञः।। 1।।

### ▲ दीनानाथ! ▲

दीनानाथ प्रभो त्वं चरणशरणको दीनहीनाश्रयोऽसि
दीनानाथोऽहमस्मि प्रभुशरणगतो दीनहीनप्रधानः।
जीवात्माधारभूतः परमपदपरः संसृतीशो गिरीशो
जीवात्माधारहीनोऽहमपदजननो संसृतीशं गृणामि ।।2 ।।

### ▲ विश्वामित्रः ▲

विश्वामित्रात्मदृष्टिस्त्रिभुवनजगती-संभ्रमाचारशीलो
विश्वामित्रात्मदृष्टिस्त्वहमपि जगती-संभ्रमाचारशीलः।
मेघच्छायोऽसि कृष्णोऽपहृतकलिमलो मोक्षदः पालकस्त्वं
मेऽघच्छायोस्मि कृष्णोऽपहृतकलिमलो
मोक्षदः पातकोहम्।।3।।

### ▲ प्रेमा रसः स्नेहिनोः ▲

नोधाभूरसराजकृष्णविशदो राधाविभावोज्ज्वलः
स्वस्तारागणनापरायणरसः कृष्णानुभावाञ्चितः।
होलीजव्यभिचारिभावजनितः प्रेमा रसस्स्नेहिनो
राधामाधवयोर्मनोजवलितोऽव्यात्कोपि संयोगजः।।4 ।।

### ▲ श्यामं प्रवीक्ष्य स्मिता ▲

आदर्शात्ममुखावलोकनपरा राधाद्भुतामज्जिता
शाटीगुण्ठितवक्त्रवक्रनयना प्रेमाभिभूता नवा
श्यामात्मीयमुखावलोकनपरं श्यामं प्रवीक्ष्य स्मिता।
श्यामाश्यामधनातिवैभवमहं प्राप्यातितृप्तोस्मि भोः!।।5।।

### ▲ चेतश्चमत्कारिणी ▲

'तारा' लंकृतिशोभमानवसनं माधुर्यमग्नं प्रियं
रीतिप्रीतिरसापगातिरसितं सत्काव्यकायं वरम्।
होलीपर्वणि वर्णरासकविता राधापि कृष्णं कविं
तल्लीनेव सदैव रञ्जयति सा चेतश्चमत्कारिणी ।।6 ।।

### ▲ चिक्षेप रङ्गं स्वकम् ▲

होलीपर्वणि रागरङ्गरसिकः शृङ्गाटके गोकुले
राधापार्श्वगतोऽनुप्रासपथिकः प्रेमोद्भवो माधवः।
आनुप्रासरसोद्गमानुभवगश्चिक्षेप रङ्गं स्वकं
श्यामाश्यामशरीरवर्णरसिता श्यामायते शंकरः।।7 ।।

### ▲ वंशीद्वयी भाषते ▲

शून्यं नैव भवेद्भविष्यसमये भावोज्ज्वलं प्रेम नौ
राधाकृष्णकरारविन्दलसिता वंशीद्वयी भाषते।
तद्वागर्थरहस्यवित्सहृदयौ साकूतसंलापिनौ
वित्तो दृष्टिपथस्मितप्रियतमौ मन्दं मिथो मञ्जुलम्।।8 ।।

।।इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित-पण्डितश्रीमोहन-लालशर्मपाण्डेयात्मजेन प्रोफेसर-ताराशंकरशर्मपाण्डेयेन प्रणीतं"श्रीकृष्णाष्टकम्"सम्पूर्णम्।।

********

# काव्यशास्त्रग्रन्थेषु रसविवेकः

❑ डॉ. कृष्णकुमारकुमावतः

भाषायां व्युत्पत्तिवर्धनाय यथा व्याकरण-शास्त्रमपेक्षते तथैव काव्ये दक्षतायै लक्षण-ग्रन्थानामावश्यकता भवत्येवेति सर्वसम्मतः पक्षः। अलंकारशास्त्रस्य ज्ञानं विना केवलं काव्ये नैपुण्यमेव न सम्पद्यते अपितु योग्यताकांक्षासत्तियुक्तवाक्य-निर्माणेऽपि सामर्थ्यं न भवति। अतः काव्यरचनाया-मलंकारशास्त्रस्यातिमहत्त्वपूर्णं स्थानमामनन्ति सर्वे। प्राचीनकालादारभ्य वर्तमानकालपर्यन्तं बहवो हि अलंकारनिबन्धकर्त्तारोऽभवन् । ते च यथायथं क्रमेण भरतमुनि-मेधाविन्-धर्मकीर्ति-भट्टि-भामह-दण्डि-भट्टोद्भट्ट-वामन-रुद्रट-आनन्दवर्धन-मुकुलभट्ट-भट्टतौत-भट्टनायक-राजशेखर-अभिनवगुप्त-कुन्तक-महिमभट्ट-भोजराज-क्षेमेन्द्र-मम्मट-रुय्यक सागरनन्दी-वाग्भट्ट-हेमचन्द्र-अमरचन्द्र-देवेश्वर-धनञ्जय-रामचन्द्र-गुणचन्द्र-विद्याधर-विद्यानाथ-विश्वनाथ-केशवमिश्र-शारदातनय-सिंहभूपाल-भानुदत्तमिश्र-रूपगोस्वामि-अप्पयदीक्षित-पण्डितराज-जगन्नाथ-नागेशभट्ट-विश्वेश्वर-नरसिंहप्रभृतयो मुख्यतमास्सन्ति।

एतैः काव्यशास्त्रज्ञैः स्वस्वकाव्यशास्त्रेषु काव्यस्य स्वरूप-हेतु-रस-दोष-गुण-रीत्यलंकाराणां विस्तरेण व्याख्या प्रस्तुता। परं कालान्तरे प्रसंगोऽयं बहुमहत्त्वपूर्णोऽभवत् यत् 'काव्यस्य क आत्मा' इत्यस्मिन् विषये एवालंकारिकाणां मतवैधर्म्यमजायत । काव्यशास्त्रस्य सम्यगनुशीलनेनैव स्पष्टं जायते यत् अलंकारशास्त्रस्यानेके सम्प्रदाया आसन् । काव्यस्य आत्मतत्त्वं किमिति जिज्ञासानिवृत्तये केचिदलंकारं, केचिद् रसं, केचिद् रीतिं, केचिद् ध्वनिं, केचिदौचित्यं, केचिद् वक्रोक्तिञ्च काव्यस्यात्मतत्त्वेन प्रमाणयन्ति, स्वीकुर्वन्ति, स्थापयन्ति च । भरतमुनेरारभ्य कालक्रमेण समीक्षाभेदे विभिन्नशताब्दीषु नवीननवीनतरसम्प्रदायानामुत्पत्तिर्जाता। तथा चेदानीं यावत्प्रसिद्धिमुपगता अधोलिखितषट्सम्प्रदायाः -

- भरतमुने रससम्प्रदायः
- भामहोद्भट्टरुद्रटानाम् अलंकारसम्प्रदायः
- दण्डिवामनयोः रीतिसम्प्रदायः
- कुन्तकस्य वक्रोक्तिसम्प्रदायः
- आनन्दवर्धनाभिनवगुप्तयोर्ध्वनिसम्प्रदायः
- क्षेमेन्द्रस्य औचित्यसम्प्रदायः।[1]

भरतादारभ्य पण्डितराजजगन्नाथपर्यन्तं सर्वे आचार्या एतेषु षट्सु सम्प्रदायेषु स्वस्यैकस्य पक्षस्य समर्थनं कुर्वन्ति पोषयन्ति मण्डयन्ति च। तथा चान्यस्य मतस्य कुत्रचिदपेक्षितं तर्कानुसारं खण्डनमपि कुर्वन्ति। अलंकारसर्वस्वस्य टीकाकर्त्रा समुद्रबन्धनेन वैज्ञानिकरीत्या सम्प्रदायोदयस्य प्रक्रिया प्रदर्शिता यथा- **"इह विशिष्टौ शब्दार्थौ काव्यम्। तयोश्च वैशिष्ट्यधर्ममुखेन व्यापारमुखेन व्यंग्यमुखेन चेति त्रयः पक्षाः। आद्येऽप्यलंकारतो गुणतो वेति द्वैविध्यम्। द्वितीयेऽपि भणितिवैचित्र्येण भोग-कृत्त्वेन वेति द्वैविध्यम्। इति पञ्चसु पक्षेष्वाद्य उद्भटादिभिरंगीकृतः, द्वितीयो वामनेन, तृतीयो वक्रोक्तिजीवितकारेण, चतुर्थो भट्टनायकेन, पञ्चम आनन्दवर्धनेन"।**[2]

अत्र षष्ठस्यौचित्यसम्प्रदायस्याविष्कर्तुः क्षेमेन्द्रस्य चर्चा समुद्रबन्धनेन न कृता तथापि क्षेमेन्द्रस्य औचित्यसम्प्रदायोऽपि अतिप्रसिद्धः। पत्रेऽस्मिन् भरतमुनिना स्थापितस्य रससिद्धान्तस्य चर्चा करिष्यामहे। काव्यशास्त्रस्येतिहासे भरतमुनिरेव

रससिद्धान्तस्य प्राचीनतमः प्रतिष्ठापक आचार्यः। तथापि राजशेखरेण काव्यमीमांसायां लिख्यते यथा **"रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः"**[3] अर्थात् सर्वप्रथमं भरतेन रूपकाणां निरूपणं कृतम्, तथा च नन्दिकेश्वरेण रसानां निरूपणं कृतम्। नन्दिकेश्वरेण विरचितो ग्रन्थ इदानीं नोपलभ्यते। नाट्यशास्त्रे रूपकाणां रसानाञ्चोभयोः विवेचनं प्राप्यते अतः रससिद्धान्तस्य आद्यप्रवर्तक आचार्यो भरत एव विद्यते । वैदिककाले ऋग्वेदे रसशब्दस्योल्लेखः सोमरसस्यार्थे "दधानः कलशे रसम् " इति दृश्यते। तैत्तिरीयोपनिषदि "रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति" एवं प्रकारेण आनन्दार्थेऽपि रसशब्दस्य प्रयोगो दृश्यते। भरतमुनिरपि रसानां ग्रहणमथर्ववेदादेव अकुरुत। यथा -

**जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि॥**[4]

**"न हि रसादृते कश्चिदर्थः प्रवर्तते"** अर्थात् रसं विना कस्यचिदप्यर्थस्य प्रवर्तनं काव्ये न संभवति । अस्मिन्नेव प्रसंगे अभिनवभारतीटीकायां लिख्यते टीकाकारेण यथा-"एक एव परमार्थतो रसः सूत्रस्थानीयत्वेन रूपके प्रतिभाति"। अर्थात् रूपके रस एव सर्वत्र सूत्रवत् प्रतीयते । "रससमुदायो हि नाट्यम्। न नाट्य एव च रसाः काव्येऽपि" एवं प्रकारेण रसविषये भरतमुनिना स्वमतं प्रकटीक्रियते । व्याकरणशास्त्रदृष्ट्या रसपदस्य "रस्यते आस्वाद्यत इति रसः, रस्यते अनेन इति रसः, रसति रसयति वा रसः, रसनं रसः आस्वादः, इति व्युत्पत्तयः प्रचलितास्सन्ति। काव्यपठनेन, श्रवणेन, लेखनेन, अभिनयदर्शनेन च यमानन्दं वयमनुभवामः स एव रस इत्यपि विद्वांस आमनन्ति। रसस्वरूपविषये विश्वनाथः साहित्यदर्पणे ब्रूते, यथा -

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः॥**
**लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥**[5]

आचार्यभरतेन नाट्यशास्त्रस्य षष्ठेऽध्याये रस स्वरूपस्य रसानुभूतेश्च विवेचनं कृत्वा रससिद्धान्तस्य "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति मूलसूत्रमिदं प्रदर्शितम्। एतस्य रसनिष्पत्तिसूत्रस्यै-वाशयमादाय उत्तरवर्तिनः मम्मटविश्वनाथादय आचार्या अपि रसनिष्पत्तिसिद्धान्तं प्रकटीकुर्वन्ति। विभावानु-भावानाञ्च विशदव्याख्यां कुर्वन्ति। यथा काव्यप्रकाशे-

**कारणान्यथ कार्याणि सहकारीणि यानि च।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥**
**विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः।**
**व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः॥**[6]

आशयोऽयं यथा जगति कारणानि कार्याणि सहकारीणि भवन्ति तथैव काव्येषु नाटकेषु च निरूपणानन्तरं जनैर्विद्वद्भिर्वा क्रमशो विभावानुभावव्य-भिचारिण उच्यन्ते। विश्वनाथेनापि साहित्यदर्पणे एवमेव रसनिष्पन्नता प्रतिपादिता, यथा -

**विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।**
**रसतामेति रत्यादिः स्थायिभावः सचेतसाम्॥**[7]

यद्यपि नाट्यशास्त्रस्य रसनिष्पत्तिसूत्रस्य विभावानुभावव्यभिचारिभावशब्दानां व्याख्यायां तु विदुषां मध्ये मतैक्यं दृश्यते तथापि संयोगाद् तथा निष्पत्तिः इति पदद्वयस्य व्याख्याप्रसंगे पर्याप्तमात्रायां मतभिन्नता दृग्गोचरीभवति। तेषु मतेषु चत्वार एव सर्वतः प्रधानाः। तेषां भट्टलोल्लट-शंकुक-भट्टनायक-अभिनवगुप्त- पादनामानि अवगन्तव्यानि। रससम्प्रदाय एतेषामेव मतमादाय साम्प्रतं प्रचलति। चत्वारि मतानि संक्षेपेण यथा- भट्टलोल्लट-स्योत्पत्तिवादः, अभिनवगुप्तेन नाट्शास्त्रस्य स्वकीयाभिनवभारतीटीकायां- भट्टलोल्लटमतस्यो-

ल्लेख: कृत:, भट्टलोल्लटेनापि सम्भाव्यते यत् नाट्यशास्त्रस्योपरि काचित् टीका रचिता परं साम्प्रतं सा नोपलभ्यते। भट्टलोल्लटेन हि 'संयोगात्' इत्यस्य 'उत्पाद्य-उत्पादकसम्बन्धात्' इत्यर्थ: तथा 'निष्पत्ति:' इत्यस्य 'उत्पत्ति:' इत्यर्थ: व्याख्यात:।

द्वितीयमतमस्ति शंकुकस्यानुमितिवाद:। अस्य मतस्यापि उल्लेखोऽभिनवभारत्यामेव संप्राप्यते। शंकुको नैयायिक: सन् विभावादिसाधनेषु रसरूपसाध्येषु चानुमाप्यानुमापकभावं कल्पयतीति।अयं 'संयोगात्' इत्यस्य पदस्य भाव: 'अनुमाप्य-अनुमापकसम्बन्धात्' तथा 'निष्पत्ति:' इत्यस्यार्थ: 'अनुमिति:' इति चिन्तयति।

रससम्प्रदायस्य तृतीय- वादोऽस्ति भट्टनायकस्य भुक्तिवाद:। भट्टनायकेन रससूत्रस्थ 'संयोगात्' इत्यस्य 'भोज्य-भोजक- सम्बन्धात्' तथा 'निष्पत्ति:' इत्यस्य 'भुक्तिरित्यर्थ: कृत:। उक्तञ्च काव्यप्रदीपे **"तस्माद्विभावादिभि: संयोगाद् भोज्यभोजक- सम्बन्धात् रसस्य निष्पत्ति-र्भुक्तिरिति सूत्रार्थ:"** इति। भट्टनायकस्य मतं मम्मटेनापि काव्यप्रकाशे स्पष्टीक्रियते यथा- **"न ताटस्थ्येन नात्मगतत्वेन रस: प्रतीयते नोत्पद्यते नाभिव्यज्यते"।** एवमेव भट्टनायकस्य रसानुभूते: स्वरूपमभिनवगुप्तो ध्वन्यालोकस्य लोचनटीकायां कथयति यथा- "भाविते च रसे तस्य भोग: योऽनुभवस्मरणप्रतिपत्तिभ्यो विलक्षण एव द्रुतिविस्तर-विकासात्मा रजस्तमोवै- चित्र्याननुविद्धसत्त्वमयनिज-चित्स्वभावनिर्वृति- विश्रान्तिलक्षण: परब्रह्मास्वादसविध:। स एव च प्रधानभूतोंऽश: सिद्धरूप इति"।

चतुर्थवादोऽस्तिअभिनवगुप्तस्याभिव्यक्तिवाद:। रससूत्रव्याख्यानसन्दर्भे व्यञ्जनावादिनोऽभिनवगुप्त-स्यैवान्तिमं मतम्। अभिनवगुप्तोऽयं व्यञ्जनावादी ध्वनिवादी आलंकारिकश्च बभूव। अभिनवगुप्तेन रससूत्रस्थ 'संयोगात्' इत्यस्य 'व्यंग्य-व्यञ्जकभावात्' तथा 'निष्पत्ति:' इत्यस्य 'अभिव्यक्तिरित्यर्थ: कृत:। एतन्मतस्य सारांशोऽस्ति यत् रसनिष्पत्ति: सामाजिकेषु भवति, स्थायीभावो वासनारूपेण सामाजिकेषु स्थिरतया तिष्ठति, साधारणीकृतविभावादिना स्थायीभावो विकसितो भवति। विभावादिसंयोगाद-व्यक्तरूपेणाभिव्यक्तो जायते, यथा जलबिन्दुनिपातेन मृत्तिकाया: गन्धस्याभिव्यक्तिर्भवति तद्वदेव।

रसनिष्पत्ते: प्रक्रियानन्तरमिदानीं विभावादीनां स्वरूपनिरूपणं क्रियते। विभावविषये आचार्यभरतेन लिख्यते यत् **"विभाव्यतेऽनेन वागंगसत्त्वाभिनया इति विभाव:। यथा विभावितं विज्ञातार्थमित्यर्था-नन्तरम्।।**[8] कविराजविश्वनाथ: साहित्यदर्पणे **"रत्याद्युद्बोधका लोके विभावा: काव्य-नाट्ययो:"** इत्युक्त्वा विभावस्य द्वौ भेदौ स्वीकरोति। लिख्यते विश्वनाथेन **"आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ"**[9] पुन: आलम्बनविभावस्य परिभाषा प्रदत्ता यथा- **"आलम्बनो नायकादिस्तमालम्ब्य रसोद्गमात्"**[10] नायकनायकादीनालम्ब्य रस: प्रकर्षं प्राप्नोति। सर्वै: काव्यशास्त्रकारै: नायकनायकादीनां पृथक्-पृथक् संख्या निर्धारिता, लक्षणान्यपि च प्रदत्तानि। विभावस्य द्वितीयभेदस्योद्दीपनविभावस्यापि लक्षणं विश्वनाथेन प्रदत्तम् यथा- **"उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये। आलम्बनस्य चेष्टाद्या देशकालादयस्तथा।।"**[11] अर्थात् उद्दीपनविभावा आलम्बनविभावेनांकुरितं रसमुद्दीपयन्ति, परितोषातिशयं नयन्ति त एव उद्दीपनविभावा: कथ्यन्ते। एवमपि वक्तुं शक्यते यत् आलम्बनस्य नायकादे: चेष्टाद्या: भ्रूनेत्रविक्षेपादय: तथा देशकालादयश्च लोके कारणानि त एव काव्यनाट्ययो: उद्दीपनविभावा भवन्ति। द्वितीयोऽस्ति अनुभाव:, अनु पश्चात् भवन्ति इति

अनुभावाः। **"अनुभावो विकारस्तु भावसं-सूचनात्मकः"**[12] अर्थात् स्वैः कारणैरुत्पादितं रत्यादिस्थायीभावं बहिः प्रकटयन् लौकिकावस्थायां कार्यरूपः तथा काव्ये नाट्ये च निवेशितः सन् अनुभाव इत्युच्यते। स्थायिभावजन्यत्वम् अनुभावत्वमिति। अनुभावस्यापि प्रकारद्वयं भवति नायकनायिकादीनां शारीरिकचेष्टाभिः प्रकटीभूताः कटाक्षभुजक्षेपादयः तथा च नायकादीनां मनस उत्पन्नाः विकाराः यथा- **"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभंगोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः॥"**[13] एतदतिरिच्य रसतरंगिण्यां जृम्भा इति नवमः सात्त्विकभावोऽपि कल्पितः। लिख्यते रसतरंगिण्यां यथा -जृम्भा च नवमः सात्त्विको भाव इति प्रतिभाति। अनुभावनिरूपणानन्तरं व्यभिचारिणः (सञ्चारिभावाः) प्रतिपादयितुमुपक्रम्यन्ते। **विविधाभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः।**[14] ये विविधरसेष्वनुकूला भूत्वा विचरन्ति त एव सञ्चारिभावाः कथ्यन्ते। एक एव व्यभिचारिभावोऽनेकेषु रसेषु भवितुं शक्नोति। अथवा एकस्मिन्नेव रसे अनेके व्यभिचारिभावा अपि भवितुं शक्नुवन्ति। **विशेषादाभिमुख्येन चरणाद् व्यभिचारिणः। स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशच्च तद्भिदाः॥**[14] एते व्यभिचारिण इत्यवधेयं यथा स्थायिनि भावे कदाचिदुन्मग्नाः जलबुद्बुदवत् झटिति प्रतीयमानत्वेन प्रादुर्भूताः, निर्मग्ना जलबुद्बुदवच्च विलम्बप्रतीतिकरत्वेन पुनस्तिरोभूता भावा व्यभिचारिणः कथ्यन्ते।[15] विभावानुभावापेक्षया विशेषेण रसपुष्टिजनकभावत्वं व्यभिचारित्वमिति। त्रयस्त्रिंश- द्व्यभिचारिभावा इति सर्वे आलंकारिका आमनन्ति। ते च यथा -

**निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः।**
**स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः॥**
**औत्सुक्योन्मादशंकाः स्मृतिमतिसहिता**
**व्याधिसंत्रासलज्जाः।**
**हर्षासूयाविषादाः सधृतिचपलता**
**ग्लानिचिन्तावितर्काः॥**[18]

व्यभिचारिभावनिरूपणानन्तरमुद्देशक्रमप्राप्तः स्थायिभावोऽधुना निरूप्यते। स्थायिभावानां संख्यानिर्धारणे आलंकारिकाणां मतैक्यं नास्ति। मनोवृत्तिरूपा अष्टौ **स्थायिभावाः** शारदातनयेन भावप्रकाशने कथ्यन्ते यत् -

**यतोऽष्टधा मनोवृत्तिः सभ्यानां नाट्यकर्मणि। अष्टावेवानुभूयन्ते तासूक्तास्तैः रसाः पृथक्॥**[19]

स्थायिभावाः मनुष्यहृदये चित्तवृत्तिरूपेण दीर्घकालपर्यन्तमवस्थिता भवन्ति। स्थायिभावस्य कैश्चिदालंकारिकैः परिभाषाः प्रदत्ताः। यथा- **अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः। आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति संमतः॥**[20] प्रतिकूलभावा अथवा अनुकूलभावाः यं भावं तिरोधातुमक्षमा भवन्ति स एव स्थायी भाव इत्यर्थः। विषयेऽस्मिन् दशरूपकेऽपि लिख्यते धनिकधनञ्जयाभ्याम्- **विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः। आत्मभावं नयत्याशु स स्थायी लवणाकरः॥**[21] नाट्यशास्त्रकारेणाचार्यभरतेन अष्टौ स्थायिभावाः स्वीकृताः। मम्मटः पृथक्तया निर्वेदमपि स्थायिभावं स्वीकृत्य नवमं शान्तरसं स्वीकरोति। यथा- **रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः॥**[22] निर्वेदः स्थायिभावोऽस्ति शान्तोऽपि नवमो रसः। या स्थायिभावानां संख्या भवति सैव रसानामपि। रसानां संख्याविषये प्रायः सर्वेषामा-लंकारिकाणां पृथक्-पृथक् मतानि वर्तन्ते। यथा भरतमुनिना अष्टौ रसाः चिन्त्यन्ते। उक्तं यथा- **शृंगारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ रसाः स्मृताः॥**[24]

आचार्यमम्मटमते नवरसाः भवन्ति। विश्वनाथो वत्सलतां स्थायिभावं स्वीकृत्य वत्सलनामकं **दशमं रसमपि** स्वीकरोति।

**स्फुटं चमत्कारितया वत्सलं च रसं विदुः।**
**स्थायी पुत्रलतास्नेहः पुत्राद्यालम्बनं मतम्॥**[25]

"उज्ज्वलनीलमणिः भक्तिरसामृतसिन्धुश्चेति" एतादृशेषु ग्रन्थेषु भगवद्विषयकरतिस्थायिभावयुक्तो **भक्तिरसोऽपि** प्राप्यते। एवं प्रकारेणाहत्य **एकादशरसानामुल्लेखः** काव्यशास्त्रग्रन्थेषु प्राप्यते। रसानां प्रधानताविषयेऽपि मतैक्यं न दृश्यते। यथा भोजेन शृंगारप्रकाशे **शृंगारस्य** तथा भवभूतिना उत्तररामचरिते 'एको रसः करुण एव' इति विलिख्य **करुणरसस्य** प्राधान्यमंगीकृतम्। अभिनवगुप्तः **शान्तरसं** रसेषु प्रधानतमं स्वीकरोति एवमेव साहित्यदर्पणकारेणाचार्यविश्वनाथेन **अद्भुतरसः** रसेषु मुख्यतमो मन्यते । ब्रूते यथा-

**रसे सारश्चमत्कारः सर्वत्राऽप्यनुभूयते।**
**तच्चमत्कारसारत्वे सर्वत्राऽत्यद्भुतो रसः॥**
**तस्माद‌द्भुतमेवाह कृती नारायणो रसम्।**[26]

अभिनवगुप्तः शान्तरसमेव सर्वेषां रसानां मूलं कल्पयति। अभिनवभारत्यां लिख्यते यथा-

**स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।**
**पुनर्निमित्तापाये च शान्त एवोपलीयते॥**

तथापि सर्वेषां रसानां महत्त्वं स्वस्वस्थाने दरीदृश्यते एव। भरतमुनिना प्रत्येकस्य रसस्य पृथक्-पृथक् देवतावर्णादयश्चोद्यन्ते । यथा -

**श्यामो भवेत्तु शृंगारः सितो हास्यः प्रकीर्तितः।**
**कपोतः करुणश्चैव रक्तो रौद्रः प्रकीर्तितः॥**
**गौरो वीरस्तु विज्ञेयः कृष्णश्चापि भयानकः।**
**नीलवर्णस्तु बीभत्सः पीतश्चैवाद्भुतः स्मृतः॥**
**शृंगारो विष्णुदैवत्यो हास्यः प्रथमदैवतः।**
**रौद्रो रुद्राधिदेवश्च करुणो यमदेवतः॥**
**बीभत्सस्य महाकालः कालदेवो भयानकः।**
**वीरो महेन्द्रदेवः स्याद‌द्भुतो ब्रह्मदेवतः॥**[27]

रसेषु परस्परं विरोधिता अविरोधितापि भवति। **"इह खलु रसानां विरोधिताया अविरोधितायाश्च त्रिधा व्यवस्था। कयोश्चिदालम्बनैक्येन, कयोश्चिदाश्रयैक्येन, कयोश्चिन्नैरन्तर्येणेति। तत्र हास्यरौद्रबीभत्सैः सम्भोगस्य। वीरकरुणरौद्रादिभिर्विप्रलम्भस्य। आश्रयैक्येन च वीरभयानकयोः। नैरन्तर्यविभावैक्याभ्यां शान्त शृंगारयोः।"**[28]

रसात्मकं वाक्यं काव्यं भवतीति प्रसिद्धमेव। एवमेव आस्वादयोग्यानां भावादीनां गणनापि रसेषु एवालंकारिकैः क्रियते। भावादिषु भाव-रसाभास-भावाभास-भावशान्ति-भावोदय-भावसन्धि-भावश-बलतानाञ्चेति भेदानां परिगणना कृता काव्यशास्त्रज्ञैः। यथा-<u>रसभावौ तदाभासौ भावस्य प्रशमोदयौ। सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः॥</u> भावस्य लक्षणं क्रियते विश्वनाथेन यथा- **सञ्चारिणः प्रधानानि देवादिविषयाः रतिः। उद्बुद्धमात्रस्थायी च भाव इत्यभिधीयते॥**[29] अनौचित्यप्रवर्तिता रसाः रसाभासा भवन्ति। तथा च अनौचित्यप्रवर्तिता भावाः भावाभासा भवन्ति। मम्मटः साक्षात् त्रयोदशरसविरोधिनो दोषान् ब्रवीति। यथा-

**व्यभिचारिरसस्थायिभावानां शब्दवाच्यता।**
**कष्टकल्पनया व्यक्तिरनुभावविभावयोः॥**
**प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।**
**अकाण्डे प्रथनच्छेदौ अंगस्याप्यतिविस्तृतिः॥**
**अंगिनोऽननुसंधानं प्रकृतीनां विपर्ययः।**
**अनंगस्याभिधानं च रसे दोषाः स्युरीदृशाः॥**[30]

**निष्कर्षः**

काव्यस्य आत्मनो विषये प्राचीनकालादारभ्य वर्तमानकालपर्यन्तं बहवो वादा अस्माकं दृष्टिपथे पथिकायन्ते। परं प्रायः आलंकारिकैः **रस** एव

काव्यात्मा अंगीक्रियते। ध्वनिकारेणापि रसध्वनिः काव्यस्यात्मा मन्यते। लिख्यते च - **रसभावतदाभासभावशान्त्यादिरक्रमः। ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः॥** प्रतिहारेन्दुना विरचितायां काव्यालंकारसारसंग्रहस्य लघुवृत्तिरिति नामधेयटीकायां रस एव काव्यात्मा कथ्यते। लघुवृत्त्यामुल्लेखः प्राप्यते यत् **रसाद्यधिष्ठितं काव्यं जीवद्रूपतया यतः। कथ्यते तद्रसादीनां काव्यात्मत्वं व्यवस्थितम्॥**[31] एवमेव अभिनवगुप्त-भोजराज-मम्मट-रुय्यक-महिमभट्ट-राजशेखर-विश्वनाथ-कर्णपूर-भूदेव-केशवमिश्र-जगन्नाथादिभिः आलंकारिकैः **रस एव काव्यात्मा** अंगीक्रियते। अलंकारशेखरे केशवमिश्रेण लिखितं यत्- **साधुपाके विना स्वाद्यं भोजने निर्लवणं यथा। तथैव नीरसं काव्यं स्यान्नो रसिकतुष्टये॥**[32] न केवलं काव्यशास्त्रिण आचार्या एव रसस्य प्रधानत्वं स्वीकुर्वन्ति अपितु कालिदासबाणभवभूत्यादयो मूर्धन्याः कवयोऽपि रसस्यैव काव्येषु महाकाव्येषु च प्रधानत्वमामनन्ति। रसकाव्यस्यातिविशिष्टं तत्त्वं वर्तते। प्रबन्धकाव्यं रचयन् कविः रसपरतन्त्रः स्यात्। भणत्यानन्दवर्धनोऽपि यथा- **कविना प्रबन्धमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम्।**[34]

1. साहित्यदर्पणः, आचार्यः कृष्णमोहनशास्त्री, सटिप्पणलक्ष्मी व्याख्या, चौखम्भा संस्कृत संस्थान, वाराणसी
2. अलंकारसर्वस्वस्य समुद्रबन्धकृता टीका पृ. 3
3. काव्यमीमांसा (राजशेखर) पृ. 4-5
4. भरत-नाट्यशास्त्रम्, 1.17
5. साहित्यदर्पणः 3.2
6. काव्यप्रकाशः 4.27-28
7. साहित्यदर्पणः 3.1
8. भरत-नाट्यशास्त्रम्, 6
9. साहित्यदर्पणः 3.29
10. साहित्यदर्पणः 3.29
11. साहित्यदर्पणः 3.131
12. दशरूपकम् 4,3
13. साहित्यदर्पणः 3.132
14. रसतरंगिणी पृ.66
15. भरत-नाट्यशास्त्रे सप्तमाध्यायः
16. साहित्यदर्पणः 3.140
17. साहित्यदर्पणः, आचार्यः कृष्णमोहनशास्त्री, सटिप्पणलक्ष्मी व्याख्या, चौखम्बा संस्कृत संस्थान, वाराणसी पृ.159
18. साहित्यदर्पणः 3.141
19. भावप्रकाशनम् अ. 2 पृ. 46
20. साहित्यदर्पणः 3.174
21. दशरूपकम् 4, 34
22. काव्यप्रकाशः 4.30
23. काव्यप्रकाशः 4.35
24. भरत-नाट्यशास्त्रे 6 .15
25. साहित्यदर्पणः 3.25
26. साहित्यदर्पणः 3.2.3 वृत्तिभागः
27. भरत-नाट्यशास्त्र 6 .42-47
28. साहित्यदर्पणः 7.31 वृत्तिभागः
29. साहित्यदर्पणः 3.261
30. काव्यप्रकाशः 7.60-62
31. काव्यालंकारसारसंग्रहस्य लघुवृत्तिः टीका-पृ.83
32. अलंकारशेखरः - 2
33. ध्वन्यालोकः 3.14 वृत्तिभागः

**सहायकाचार्यः विभागाध्यक्षश्च-संस्कृतम्**
**राजकीयमहाविद्यालयः, राजसमन्दः**
**(राजस्थानम्) मो.: 8377917640**

# व्यासस्य ज्ञानसन्देशः सर्वलोकहितावहः

❑ पं. नथमलशास्त्री

अथ सृष्ट्यादौ क्षीराब्धौ शेषशायिनो भगवतो नारायणस्य नाभिपद्मसमुद्भवो भगवान् ब्रह्मा यदा सर्वतो द्रष्टुमैच्छत्तदा सद्यः स सर्वतोऽक्षिशिरोमुखः सर्वदर्शन-श्चतुराननो बभूव। ततश्च भगवता नारायणेन प्रचोदिता स्वलक्षणा वाग्देवी सरस्वती ब्रह्मणो हृदि शाश्वतीं स्मृतिं व्यतनोत्तदास्यतश्च प्रादुरभूत्। ततो ब्रह्मा पूर्वादिभिर्मुखै-र्ऋग्यजु:सामाथर्वाख्यांश्चतुरो वेदानसृजत् तथा च सर्वेभ्य एव वक्त्रेभ्य इतिहासपुराणानां पञ्चमं वेदं ससर्ज। तद्यथा –

**इतिहासपुराणानां पञ्चमं वेदमीश्वरः।**
**सर्वेभ्य एव वक्त्रेभ्य ससृजे सर्वदर्शनः।।**

(भा. 3/12/39)

आदिपुरुषस्य भगवतो नारायणस्य चतुर्विंशत्य-वतारकथाप्रसङ्गे वर्णितमस्ति श्रीमद्भागवते-

**द्वापरे समनुप्राप्ते तृतीये युगपर्यये (1/4/14)**
**ततः सप्तदशे जातः सत्यवत्यां पराशरात्।**
**चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोऽल्पमेधसः।।**

(1/3/29)

एवं चतु:सनाद्यवतारेषु क्रमागतरूपेणायमवतारः सप्तदशः स्मृतः। एवमेव –

**पराशरात् सत्यवत्यामंशांशकलया विभुः।**
**अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम्।।**
**ऋगथर्वयजु:साम्नां राशीनुद्धृत्य वर्गशः।**
**चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव।।**

(12/6/49-50)

कर्तुमकर्तुमन्यथाकर्तुं समर्थः स ईश्वरो विभुः प्रमुखे द्वापरयुगे पराशरात्सत्यवत्यामवतीर्णो ज्ञानावतारो वेदव्यासो वेदमेकं चतुर्धा विभज्य तत्तद्वेदमन्त्रैश्चतस्रो वेदसंहिता-श्चक्रे। ततश्चायमाद्याचार्यस्ताः मन्त्रसंहिताः पैलादीन् स्वशिष्यानध्यापयामास। पुराणाचार्यताञ्च भगवत्कथा-मृतास्वादनतत्पराय गुरुकृपावलम्बनाय स्वशिष्याय यथा नाम तथागुणाय रोमहर्षणसूताय प्रायच्छत्।

**आद्याचार्यो हरेरंशश्चिरजीवी समाधिमान्।**
**क्रान्तद्रष्टा कविर्विज्ञोऽद्वैतवेदान्तदर्शनः।।**
**भारते ब्रह्मसूत्रे च पुराणोपनिषत्सु च।**
**वेदानां व्यसनाद्वेद-व्यासः ख्यातो महामुनिः।।**

एवं हरेरंशो महामुनिरद्वैतवेदान्तदर्शनो वेदानां व्यसनाद्वेदव्यासो (कृष्णद्वैपायनो व्यासः) महाभारतेऽ-ष्टादशपुराणेषु च वेदविद्यां व्यतनोत्। पुण्यश्लोकोऽयं ज्ञानावतारः शतसाहस्रीं संहितां (महाभारतम्) चारुतरैश्चतुर्लक्षश्लोकैरष्टादश पुराणानि च विरच्य यावच्चन्द्रदिवाकराखण्डज्ञानप्रदीपं जगत्यां प्रजज्वाल।

अतोहि सः पञ्चमवेद-प्रणेता काव्यस्रष्टा कविरेकवदनो "ब्रह्मा" कथ्यते। अयञ्च विश्वम्भरो जगत्कर्ता जगद्भर्ता जगत्पालनतत्परो द्विबाहुरपरो हरि-र्भूत्वाभितापसन्तप्ताँल्लोकान् भवबन्धकृन्तनं ज्ञानामृतं पाययित्वा जगतीं परिपालयामास। तथा वै धर्मज्ञानविज्ञान-भक्तिविरक्तिसमन्वितामध्यात्मविद्यां प्रचचार ररक्ष च। अयं ब्रह्मर्षिस्त्रिनेत्रस्तु नैवास्ति परमविद्याग्रस्तानाम-ज्ञानान्धकारनिमग्नानां लोकानामज्ञानहेतुकृतमोहम-दान्धकारस्य संहर्ता शम्भुरिव सर्वसमर्थोऽस्ति।

अत एवोच्यते- **अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः।**
**अभाललोचनः शम्भुर्भगवान् बादरायणः।।**

कृतज्ञा वयं प्रतिवर्षमाषाढीपूर्णिमायां (व्यासपूर्ण-मायां) धर्मज्ञानतपोमूर्तिं ज्ञानावतारं वेदव्यासं पूजयामः। यत्र तत्र भागवतधर्मपरायणा मनीषिणो मनस्विनश्च विनयावनता वेदव्यासस्य सुपुण्यां यशोगाथामेवं गायन्ति मुहुर्मुहुर्जयमुद्गिरन्ति च। मुनीनामप्यहं व्यासः ब्रह्मविष्णुशिवात्मकोऽयं भगवद्विभूतिश्चिरजीवी भगवान् बादरायणः सरस्वत्यास्तटे बदरीवने विशाला-निकटस्थे स्वशम्याद्वासाश्रमे दिव्यदेहेन विराजमानोऽद्यापि तपस्तपति।

अनन्तश्रीविभूषितः षड्गुणैश्वर्यसम्पन्नो ज्ञानावतारो, वेदोऽखिलो धर्ममूलमिति शाश्वतसिद्धान्तस्य सूक्ष्म-विवेचको, अनिर्वचनीयानाद्यपौरुषेयवेदविद्यायाश्च

विस्तारको वेदव्यासो विजयते।

अद्वैतवेदान्तदर्शनस्य प्रतिपादकः प्रस्थानत्रयी-(उपनिषद्गीता ब्रह्मसूत्राणि) प्रस्थापकः, षड्दर्शन समन्वयपूर्वकं पञ्चदेवोपासनायाश्च पक्षधरः श्रुतिस्मृति पुराणोक्तधर्मतत्त्वस्याद्वितीयो व्याख्याता, तथा चाद्वैतामृत-वर्षिण्यां श्रीमद्भगवद्गीतायाञ्च ज्ञानकर्मभक्तियोग-त्रिवेण्याः प्रवाहकोऽदभ्रदयः क्रान्तद्रष्टा कवीश्वरः, वेदोपनिषदां साराज्ज्ञाता भागवतीकथायाश्च समाधिसिद्धो मन्त्रद्रष्टा ऋषिर्भक्तिज्ञानविरागाप्तविवेकमूर्तिर्वेदव्यासो जयतात्सदा। एवमेव रासोत्सवः सम्प्रवृत्तो गोपीमण्डल-मण्डितः (रासपञ्चाध्यायी) इत्यत्र ''रसो वै सः'' सच्चिदानन्दघनस्वरूपः परमात्मा लीलापुरुषोत्तमः प्रेममूर्तिः श्रीकृष्णः (परमानन्दं, पूर्वं ब्रह्म सनातनं गूढं परं ब्रह्म मनुष्यमीड्यम्) श्रीधामवृन्दावने गोपगोपीनां मित्रं कोटिकन्दर्पलावण्यो मन्मथमन्मथो मुरलीधरो गोपाल-बालो (आनन्दं ब्रह्म) हि गोपीमण्डलमण्डितो नृत्यतीति व्रजौकसामहोभाग्यमहोभाग्यमिति वर्णितं भगवता वेदव्यासेन।

एतावतात्र-रासरससिद्ध्या भागवतरसाभिव्यक्त्या च भगवता व्यासेनोपकृता गुणज्ञा रसिका भावुकाश्च भक्तिर-सभावमयं मधुरातिमधुरं प्रसादं समास्वाद्यानन्दसमुद्र-मग्नाः कृतज्ञतां ज्ञापयन्त आद्याचार्यं जगद्गुरुं तपोनिधिं शुकतातं-श्रद्धावनताः प्रणमन्ति।

एवमेवान्यदपि - अस्मद्राष्ट्रस्य ध्येयवाक्यं ''सत्यमेव जयते'' विद्यते तथैव श्रीमद्भागवतस्यापि-ध्येयवाक्यं ''सत्यं परं धीमहि'' इत्येव ज्ञेयम् स्वाध्याय श्रीलैर्विद्वद्भिर्ग्रन्थादावन्ते च तदत्रापि द्रष्टव्यम् -

**ग्रन्थादौ- जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराडिति- पद्ये धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि (1/1/1)**

ग्रन्थान्तेऽपि-'कस्मै (ब्रह्मणे) येन विभासितोऽयमतुलो ज्ञानप्रदीपः पुरा' इति पद्ये तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि (12/13/19) ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः।

एवं श्रीमद्भागवते सत्यधर्मपराक्रमः सत्यात्मकः सत्यनारायणो हरिरेव सर्वत्र गीयते। अतोहि ज्ञानावतारस्यायं श्रीमद्भागवतमहापुराणग्रन्थो हि गौरवमयं राष्ट्रिय-ग्रन्थपदमलङ्कर्तुमर्हति।

सम्प्रति-युगोऽयं दारुणः कलिः, अधर्मप्रभवः कलिः, अनृतेनैधते कलिरिति-धर्मनिरपेक्षताव्याजेना- सत्येन प्रवर्धमानोऽहर्निशं धर्मोच्छेदनतत्परो नग्नो नृत्यति प्रमोदते च तद् यथा-

**मद्यपानस्थले द्यूते जीवहिंसास्थलेषु च।**<br>
**स्वैरिणी-व्यभिचारे च निःशंको नृत्यते कलिः।।**

अयं तु युगधर्मो हि वर्तते कस्य दूषणम्? अतोहि भगवत्कृपाशक्तिं समाश्रित्य तपः शौचं दया सत्यमिति चतुष्पदस्य धर्मतत्त्वस्य प्रचाराय रक्षणाय च-

''वयं राष्ट्रे जागृयाम पुरोहिताः'' यत्र तत्र संस्कृतानुरागिणो वयं सततं सावधाना जागरिताश्च सन्तः स्वाध्यायप्रवचनतत्परा भवेम।

**एतदर्थम्-आचार्यैः शास्त्रिभिश्चैव विद्वद्भिः संस्कृतैस्तथा।**<br>
**धनिकैर्भगवद्भक्तैर्धर्माचार्यैश्च धार्मिकैः।।**<br>
**कार्या श्रीव्यासापीठस्य स्थापना भक्तिभावतः।**<br>
**सत्संगो ज्ञानयज्ञाख्यो नित्यं स्यात् सार्ववर्णिकः।।**

राष्ट्रस्य सर्वदेवस्थानेषु व्यासपीठं संस्थाप्य ज्ञानयज्ञेन सत्यमेव जयते, सत्यं परं धीमहि, सत्यधर्माय दृष्टये, न हि सत्यात्परो धर्मः, सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिशाश्वत-सत्यसिद्धान्तानां व्यासप्रदत्तज्ञानसन्देशानाञ्च प्रचुरः प्रचारो विधेयोऽस्माभिरित्येव धारणीयः सद्धर्मः समेषां स्वधर्मसंस्कृतनिष्ठानां भद्रपुरुषाणां सामाजिकानाञ्च। 'दक्षिणा ज्ञानसन्देशः' इति व्यासवचनादियमेवाद्यतना ज्ञानमयी भूयसी गुरुदक्षिणा भगवते वेदव्यासाय समर्पिता स्यादिति मे प्रस्तावः।

**एवं ऋषिऋणान्मुक्ताः सन्तभक्तगृहाश्रमाः।**<br>
**आत्यन्तिकं सुखं शान्तिं प्राप्नुयुः शुद्धमानसाः।।**<br>
**नित्यं स्वाध्यायशीलाश्च सात्त्विकाः सत्यभाषिणः।**<br>
**भक्तिशक्तियुताः सन्तु सेवाधर्मरता नराः।।**<br>
**व्यासस्य ज्ञानसन्देशो भूयाल्लोकसुखावहः।**<br>
**प्रसवश्च श्रुतोऽधीतो भारते भातु भास्वरः।।**

''इयं मे भगवत्स्तुतिः''

शुभमस्तु नित्यम्।।

**छापर (चूरू)**

# अष्टाङ्गयोगे यमनियमानुपालने वितर्का: निराकरणमनुपालनपरिणामाश्च

❑ डॉ. उषाकिरणयादव:

पातञ्जलयोगदर्शनं योगस्य सुप्रसिद्धो ग्रन्थोऽस्ति। ग्रन्थेऽस्मिन् योगस्य व्यवस्थितं सारगर्भितं वर्णनं वैज्ञानिकविधिना कृतम्। व्यासभाष्यमस्य शास्त्रस्य प्रमुखभाष्यमस्ति येन सूत्राणामर्था: सुगमा भवन्ति। व्यासभाष्येणैव स्पष्टीभवति यत् समाधिपादे निरूपितो योग एकाग्रचित्तानां जनानाङ्कृतेऽस्ति साधनपादे च योगस्य वर्णनं चञ्चलमनसां कृते कृतम्- **''उद्दिष्टः समाहितचित्तस्य योगः। कथं व्युत्थितचित्तोऽपि योगयुक्तः स्यादित्येतदारभ्यते।''**

साधनस्वरूपयोग: तप:स्वाध्यायेश्वरप्रणिधाना-ख्यानां तिसृणां क्रियाणां मिश्रितरूपं भवति[1]। तात्पर्यमिदमस्ति यत्तिस्र: क्रिया एकस्य योगस्य अवयवा: सन्ति। एका द्वे वा क्रिये साधनयोगस्य लक्षणं नास्ति।

साधनयोगेऽस्मिन्नशुद्धिक्षयार्थमष्टाङ्गयोगस्यानुष्ठा-नमावश्यकं भवति[2]। अष्टाङ्गयोगे यमनियमानामनुपालन-मतिमहत्त्वपूर्णमस्ति[3]। किन्तु कार्यमिदमतिदुष्करमस्ति व्युत्थितचित्तानां जनानां कृते। पातञ्जलयोगदर्शने निरूपितं यदेते यम-नियमा: वितर्कै: बाधितुं शक्यन्ते। यम-नियमानां वितर्कैर्बाधिते सति दूरीकरणाय तेषां के उपाया:, यम-नियमानुपालनस्य लाभा: कीदृशा: भवन्ति अर्थात् सुपरिणामा: के सन्ति इत्यपि शास्त्रेऽस्मिन् प्रतिपादितं यस्य वर्णनमेतस्य शोधलेखस्य प्रतिपाद्य-मस्ति। वर्णनमिदं व्यासभाष्येण सहाधोलिखित-रूपेणेत्थमस्ति।

**वितर्कबाधनोपाया:**- महर्षिपतञ्जले: मतमस्ति यदेतेषु यमादिषु बाधितेषु सत्सु तेषां प्रतिपक्षस्य भावना करणीया।

**एतेषां यमनियमानाम्[4] वितर्कबाधने प्रतिपक्ष-भावनम्।[5]**

वितर्का: हिंसादयो विरोधिभावा: भवन्ति ये योगिनं विपरीतमार्गे प्रवर्तयितुं शक्नुवन्ति अतस्तेषा-मुन्मूलनमावश्यकं भवति यत् प्रतिपक्षभावनया भवितुं शक्यते। इयं भावना कथं करणीया इत्येकेनोदाहरणेन स्पष्टीकृतं व्यासभाष्ये। तदनुसारं यदि योगिन: मनसि कोऽपि यमादिवितर्को जायते तर्हि तेन ध्यातव्यमिदं यत्तेनातिकष्टयुतसंसारस्य कष्टै: पीडितेन समस्तप्राणिभ्य अभयदानाय योगमार्ग: अङ्गीकृतस्तं परित्यज्य तत: प्रतिकूलमार्गं गृहीत्वा च स: श्वानवृत्ति: संजात: यो वमनपदार्थं लिह्यति। भाष्यानुसारमन्यस्य कस्यापि नियमस्य बाधिते सत्यपि एवमेव तस्य प्रतिपक्षनियम-ग्रहणस्य कारणं विचारणीयन्तस्य परित्यागे चात्मनिन्दा करणीया।[6]

ग्रन्थे हिंसादीनां वितर्काणां परिणामाश्चापि भेदै: सह कथिता: येषां ज्ञाने प्रतिपक्षभावना सुकरा भवितुं शक्यते।

**वितर्काणां कारणानि** - सर्वेषां वितर्काणां हेतवस्त्रयो भवन्ति-लोभ: क्रोधो मोहश्च।

**वितर्काणां दुष्परिणाम:**- एषां दुष्परिणामो भवति-अनन्तं दु:खमनन्तञ्चाज्ञानम्। अत्रैव वितर्काणां भेदा अपि प्रतिपादिता:। मौलिकं वर्णनमित्थमस्ति ग्रन्थे-

**''वितर्का हिंसादयः कृतकारितानुमोदिता<br>लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा<br>दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम्।।''**[7]

भेदानां सविस्तरं कथनं व्यासभाष्ये कृतं, तदनुसारं प्रत्येकं वितर्क: एकाशीतिभेदात्मको भवति। अग्रे चा-[8]

वितर्काणाङ्कारणपरिणामचिन्तनपरायाः प्रतिपक्षभावनाया एकः दृष्टान्त इत्थमुक्तो भाष्ये-

"तथा च हिंसकस्तावत्प्रथमं वध्यस्य वीर्यमाक्षिपति ततश्च शस्त्रादिनिपातेन दुःखयति। ततो जीवितादपि मोचयति। ततो वीर्याक्षेपादस्य चेतनाचेतनमुपकरणं क्षीणवीर्यं भवति। दुःखोत्पादान्नरकतिर्यक्प्रेतादिषु दुःखमनुभवति। जीवितव्य परोपणात् प्रतिक्षणं च जीवितात्यये वर्तमानो मरणमिच्छन्नपि दुःखविपाकस्य नियतविपाकवेदनीयत्वात् कथञ्चिदेवोच्छ्वसिति। यदि च कथञ्चित्पुण्यादपगता हिंसा भवेत्तत्र सुखप्राप्तौ भवेदल्पायुरिति। एवमनृतादिष्वपि योज्यं यथासम्भवम्। एवं वितर्काणां चामुमेवानुगतं विपाकमनिष्टं भावयन्न वितर्केषु मनः प्रणिदधीत।।"[9]

यमनियमानां वितर्केषु हिंसावितर्कस्य दृष्टान्तेनात्र स्पष्टीकृतमिदं यत् कथं हिंस्यप्राणिनो दुःखानुरूपमेव हिंसकः दुःखस्यानुभवं करोति। तेनोपभुज्यमानानां दुष्परिणामानां बिन्दुशः कथनमित्थमस्ति-

1. हिंस्यप्राणिनो बलावरोधेन हिंसकस्य चेतनाचेतनसाधनानि निष्क्रियाणि जायन्ते।

2. हिंसकेन शस्त्रादेः प्रहारेण प्राणिने यद् दुःखं प्रदीयते तस्य फलस्वरूपे सः नरकं प्राप्य तिर्यक्प्रेतादियोनिषु कष्टमनुभवति।

3. हिंसकेन प्राणी जीवरहितः क्रियते तेन हिंसकः सदा मृतप्राय एव भवति। मुमूर्षुः सन्नपि कृतहिंसायाः दुःखरूपं निश्चितं फलभोगपर्यन्तं सः श्वासमात्रेण जीवति।

4. येन केन पुण्यादिना तस्य हिंसादोषदुःखं सुखे परिणमति तर्हि तस्योपभोगाय आयुः नावशिष्यते।

भाष्यकारस्य मतमस्ति यदन्येषामपि वितर्काणामीदृशान्दुष्परिणामाननुमाय योगिना सदा तेषां प्रतिपक्षस्य भावना करणीयाऽनुपालनीया च। यम-नियमानुपालनस्य सुपरिणामः-यम-नियमानामनुपालनस्य के सुपरिणामाः भवन्ति इत्यपि पातञ्जलयोगदर्शने निरूपितं सविस्तरं प्रत्येकस्य पृथक्-पृथक् परिणामकथनेन। वर्णनमित्थमस्ति -

यमेषु - 1. सदा सर्वथाऽहिंसापालनकर्तुः योगिनः समीपे निवासिनो विरोधिहिंसकप्राणिन अप्यविरोधिनः सन्तः प्रेम्णा व्यवहरिन्त।

2. सत्याचरणेन योगिनः सर्वाः क्रियाः सफलाः भवन्ति।

3. अस्तेयस्य प्रतिष्ठायां समस्तरत्नानां प्राप्तिः भवति।

4. ब्रह्मचर्यस्य परिपालनेन शरीरमिन्द्रियाणि च विशेषशक्तिसम्पन्नानि जायन्ते।

5. अपरिग्रहे स्थिरे संजाते योगी जन्मनः सर्वं ज्ञान-विज्ञानमाप्नोति।

6. अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः। सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्। अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्।
ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः।
अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः।[10]

नियमेषु 1. शारीरिकशुद्धेः परिपालनेन योगी देहस्य दोषमयतां ज्ञात्वा स्वस्यान्येषां च शरीराणि प्रत्यनासक्तो जायते।

आन्तरिकशुद्ध्या क्रमशः बौद्धिकी-मानसिकी-प्रसन्नतैकाग्रतेन्द्रियजयश्च भवति येन बुद्धिः आत्म-साक्षात्कारे समर्था भवति।[11]

2. सन्तोषमनुपालनेन सर्वोत्कृष्टसुखस्य प्राप्तिः भवति।[12]

3. तपसाऽशुद्धीनां क्षयो भवति येन योगिना विविधशारीरिकैन्द्रिकसिद्धयः प्राप्यन्ते।[13] अणिमाद्याः

शारीरिकसिद्धयः कथ्यन्ते। दूरदर्शनश्रवणाद्या इन्द्रिय-सिद्धयो भवन्ति।[14]

4. स्वाध्यायेन योगी इष्टदेवं प्राप्नोति।[15] व्यास-भाष्यानुसारम् देवा ऋषयः सिद्धाश्च स्वाध्यायशीलस्य दर्शनम् इच्छन्ति कार्ये चास्य वर्तन्त इति।[16]

5. ईश्वरप्रणिधानात् समाधिः सिद्ध्यति।[17] व्यास-भाष्ये समाधिसिद्धेः फलमित्थमुक्तम्- "यया सर्वमीप्सितमवितथं जानाति देशान्तरे देहान्तरे कालान्तरे च। ततोऽस्य प्रज्ञा यथाभूतं प्रजानातीति।"[18]

निष्कर्षोऽयमस्ति यद्यमनियमानामनुपालनं विघ्नैः परिपूर्णमस्ति। उपरोक्तसाधनैस्तेषां समाधानं कृत्वा योगिनाऽनवरतं योगमार्गे प्रवर्तितव्यं समभावेन धैर्येण सह तदैव योगस्य लौकिकालौकिकफलं प्राप्तुं शक्यते। मौलिककर्त्तव्यरूपेऽप्येषां यम-नियमानामनुपालना सर्वेषामेव मनुष्याणां कृतेऽपरिहार्याऽस्ति। अस्यामेव व्यक्तेः मानवसमुदायस्याखिलचराचरस्य विश्वस्य कल्याणं सन्निहितं विद्यते।

**सन्दर्भाः-**

1. 'तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः'।। महर्षिपतञ्जलिप्रणीते पातञ्जलयोगदर्शने साधनपादे प्रथमसूत्रम्। प्रकाशकः- जगदीशसंस्कृतपुस्तकालयः जयपुरम्।2008।व्यासभाष्यान्वितम्।

2. (क) योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिरविवेक-ख्यातेः।

(ख) यमनियमासनप्राणायाम-प्रत्याहारधारणाध्यान-समाधयोऽष्टावङ्गानि। तत्रैव, 28-29 तमे सूत्रे।

3. (क) अहिंसासत्यास्तेयब्रह्मचर्य परिग्रहाः यमाः।।

(ख) शौचसन्तोष- तपः स्वाध्यायेश्वरप्रणिधानानि नियमाः। तत्रैव, 30, 32 सूत्रे

4. तत्रैव व्यासभाष्यम्, 33 सूत्रात्पूर्वम् 132 पृष्ठे।

5. तत्रैव, 33 सूत्रम्।

6. यदास्य ब्राह्मणस्य हिंसादयो वितर्का जायेरन्..........। एवमुन्मार्गप्रवणवितर्कज्वरेणातिदीप्तेन बाध्यमान-स्तत्प्रतिपक्षान् भावयेत्। घोरेषु संसाराङ्गारेषु पच्यमानेन मया शरणमुपागतः सर्वभूताभयप्रदानेन योगधर्मः। स खल्वहं त्यक्त्वा वितर्कान् पुनस्तानाददानस्तुल्यः श्ववृत्तेनेति भावयेत्। यथा श्वा वान्तावलेही तथा त्यक्तस्य पुनराददान इति। एवमादि सूत्रान्तरेष्वपि योज्यम्। तत्रैव, व्यासभाष्यम् 133 पृष्ठे।

7. तत्रैव, सूत्रसंख्या 34

8. एवमेकाशीतिभेदा हिंसा भवति। सा पुनर्नियम-विकल्पसमुच्चयभेदादसङ्ख्येया.....। एवमनृतादिष्वपि योज्यम्। तत्रैव, 34 तमसूत्रस्य भाष्यम् 135 पृष्ठे।

9. तत्रैव, 34 सूत्रस्य भाष्यम् 135-36 पृष्ठयोः।

10. तत्रैव, 35, 36, 37, 38, 39 सूत्राणि।

11. (क) शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः।।

(ख) सत्त्वशुद्धिसौमनस्यैकाग्र्यैन्द्रियजयात्मदर्शन-योग्यत्वानि च।। तत्रैव 40-41 सूत्रभाष्यम्।

12. सन्तोषादनुत्तमसुखलाभः।। तत्रैव 42 तमं सूत्रम्।

13. कायेन्द्रियसिद्धिरशुद्धिक्षयात् तपसः।। तत्रैव 43 तमं सूत्रम्।

14. कायसिद्धिरणिमाद्या, तथेन्द्रियसिद्धिर्दूराच्छ्र-वणदर्शनाद्येति। तत्रैव 43 तम-सूत्रस्य व्यासभाष्यम् 144 पृष्ठे

15. स्वाध्यायादिष्टदेवतासम्प्रयोगः।। तत्रैव, 44 तमं सूत्रम्

16. तत्रैव, 44 तमं सूत्रम् व्यासभाष्यम् 144 पृष्ठे।

17. समाधिसिद्धिरीश्वरप्रणिधानात्। तत्रैव, 45 सूत्रम्

18. तत्रैव, 45 सूत्रष्य भास्यम् पृष्ठांके 145

**सह आचार्या, संस्कृतविभागे**
**से.मु.मा. राज. कन्यामहाविद्यालये,**
**भीलवाड़ानगरम्-311001, (राजस्थानम्)**
**चलसकेतांकाः - 9414812105**

# एकाकिनः शिशोः बालगीतम्

❑ डॉ. हर्षदेवमाधवः

वदिष्यामि नैवाहं मात्रा।
वरिष्यामि नैवाहं पित्रा।

पालयति मां सदा सेविका।
खादयति मां मुदा सेविका।
स्वापयति मां सदा सेविका।

नैव दृश्यते माता प्रातः।
नैव दृश्यते पिता च प्रातः।
परिचरति मां दिने सेविका।
मया च वसति दिने सेविका।

धावति माता ननु वृत्त्यर्थम्।
धावति जनकः निजसेवार्थम्।
भ्राता गच्छति पठितुं शीघ्रम्।
भगिनी गच्छति सखिभिः सार्धम्।

लाडयति मां नहि खलु जननी।
त्यक्त्वा नित्यं गच्छति जननी।

रविवासरे वसन्ति सर्वे।
तदा मोदते हृदयं गेहे।
खादयति माता सस्नेहम्।
खेलयति जनकः सानन्दम्।
प्रतिदिनम् आयात् रविवारः।
स्यात् गेहे सार्धं परिवारः।

# सद्यस्के अध्ययने अरुचि

❑ डॉ. हर्षदेवमाधवः

सङ्गणके शालायाः त्रस्तः
सङ्गणके कक्ष्यायाः व्यग्रः।
एतत् कीदृशं पठनं मातः
खेदकरं मे पठनं मातः।

नैव शिक्षकाः, नैव वयस्याः।
परिहासा न, नैव च खेलाः।

दृश्यपटं त्रस्तो हि पठित्वा।
श्रान्ते नेत्रे दृष्ट्वा दृष्ट्वा।
श्रान्तः गृहकार्यं ननु कृत्वा।
पठनार्थं चिन्ता मे बुद्ध्वा।
प्रेषय शीघ्रं मां ननु शालाम्।
मिलितुमिच्छा सर्ववयस्यान्।
सङ्गणकं नितरां निर्जीवम्।
सक्तं करोमि कथं नु चित्तम्।

8, राजतिलकबंगलोज़ ममता हॉस्पिटल के सामने,
आबादनगर बस स्टॉप समीप, बोपल, अमदाबाद-३८००५८
मो. ९४२७६ २४५१६, ७८७४५ ३२२२५

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 150/–, पंचवर्षीय शुल्क 700/–, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या – 2139101912498
IFS Code - CNRB0002139

# ज्योतिषशास्त्रे वृष्टिस्वरूपम्

❑ रणसिंहजाटः शोधच्छात्रः

वयं जानीमः यदिदं ज्योतिषं त्रिस्कन्धात्मकं सिद्धान्तहोरासंहितारूपम्[1]। तत्र वृष्टिज्ञानं संहितायाः विषयः। वृष्टिनिमित्तसूचनां प्रददाति ज्योतिषस्य संहितास्कन्धः। बृहत्संहितायां वृष्टिनिमित्ताः पञ्च अध्यायाः वर्तन्ते यत्र अतिविस्तरेण वराहमिहिरः वृष्टिविज्ञानं प्रस्तौति । आचार्यः वराहमिहिरः वृष्टेः महत्त्वं प्रतिपादयन् वक्ति यत् यतोहि वृष्टिमाश्रित्य सकलं जीवनं प्रवर्तते अतः सांहितिकैः कृषिवैज्ञानिकैः आदौ सम्यक्तया वृष्टिकालं विचारणीयम् ।

तथा हि –

**वृष्टिमूला क्रियाः सर्वाः वृष्टिमूलं च जीवनम् ।**
**तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत्।।**
**अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम् ।**
**यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन[2]।।**

वृष्टिनिमित्तं परीक्षितुम् आचार्यः कथं भवेत् इत्येतद् विमृशन् वक्ति वराहः –

**दैवविद्विहितचित्तो द्युनिशं यो गर्भलक्षणे भवति ।**
**तस्य मुनेरिव वाणी न भवति मिथ्याम्बुनिर्देशे ।।**

अर्थात् यः दैवविद् सदैव दिवानिशं गर्भलक्षणे मेघः कदा जलम् धत्ते, इतीदं परीक्षते तस्य वाणी वृष्टिकालनिर्धारणे कथमपि कदापि मिथ्या न भवति । अनेन यदि कोऽपि वृष्टिकालं निश्चेतुं वाञ्छति चेदसौ सर्वदा तन्निमित्तभूतानि लक्षणानि सततं परीक्षेत।

**1. वृष्टिहेतुः सूर्यः**

जलस्य महत्स्रोतो वृष्टिरेव। वृष्टेरेव प्राप्तं जलं समुद्रेषु सरःसु निर्झरेषु पतत् विभिन्नेषु स्रोतःसु प्रवहत् प्राणिनः प्राणभृतः करोति। समुद्रात् पृथिवीतलाद् वा सूर्यः रश्मिभिः सन्तप्तं जलं वाष्पं भूत्वा वायुना सम्मितं उपरि गत्वा ततो आर्द्रतां सम्प्राप्य वृष्टिरूपेण पुनः पृथिव्यां वर्षति। सामान्यरूपेण इदं जलं निर्मलं भवति। एतत् जलं संचयित्वा आवर्षं पातुं अन्यान्यकार्येषु विनियोक्तुं शक्यते। भारतसदृशे देशे यत्र जलप्राप्तिसाधनं सीमितमस्ति तत्र इदं निरापदं श्रेष्ठं च साधनं मन्यते। कृषिकर्मण्यस्य जलस्याधिकाधिकप्रयोगो भवति।

भारतसदृशेषु अनेकेषु देशेषु कृषेः एतन्मात्रं साधनं वर्तते। वर्षति मेघे एव भूमिगतं जलं वर्धते। कूपः सरांसि च प्रपूर्यन्ते। सूर्य अष्टाभिर्मासैः स्वकिरणद्वारा अपां सारभूतं रसद्रव्यं समाकृष्य स्वस्मिन् समाहितं स्थापितं सत् तं स्वस्मिन् वर्तमानं तमेव रसं वृष्टिद्वारा भूमौ निक्षिपति तत एवान्नं उपसेचनद्रव्यञ्च सम्भवति। तदुक्तं रामायणे–

**नवमासधृतं गर्भं भास्करस्य गभस्तिभिः।**
**पीत्वा रसं समुद्राणां द्यौः प्रसूयते रसायनम्[3]।।**

अस्मिन् श्लोके रूपकालङ्कारः अस्ति। यथा स्त्री नवमासं यावत् गर्भं धारयति तथैव आकाशरूपा स्त्री कार्त्तिक्या आषाढं यावत् स्वस्यां संस्थाप्य पश्चाद् जलरूपं सन्ततिं सूते।

अस्माकं सौरमण्डले सूर्यः कालस्य नियामकोऽस्ति।

सूर्य एव पृथिव्यां वृष्टेः अधिष्ठाता वर्तते । उक्तं हि -

**आदित्याज्जायते वृष्टिरिति।**[4]

अनुदिनमसौ स्वरश्मीन् परिवर्त्य अहर्निशं देवपितृमनुजान् तर्पयति ।

**ग्रीष्मे हिमे च वर्षासु च मुच्यमानो**
**घर्मं हिमं च वर्षञ्च निशादिनञ्च।**
**गच्छत्यसावनुदिनं परिवर्त्य रश्मीन्**
**देवान् पितॄँश्च मनुजांश्च सुतर्पयन् वै।।**

शुक्लकृष्णपक्षयोः मासक्रमेण कालेन सूर्यरश्मयः सुवृष्ट्ये रश्मिषु यदमृतभूतं जलं रक्षन्ति तत्सूर्यकिरणैः वर्षार्थं गृह्यते विवृद्धं च पुनर्वर्ष्यते। तदुपभोगेन तज्जन्यौषधीभिश्च मर्त्याः क्षुधं शमयन्ति। एवं सूर्यरश्मिभिः पाल्यमानाः मनुष्याः जीवन्ति। यथोक्तं यत् सर्वविधवृष्टीनां मेघा एवं आधारा भवन्ति। सूर्यश्च वृष्ट्युत्पादको भवति, तदुक्तम् -

**समुद्राद्वायुसंयोगाद् वहन्त्यापो गभस्तयः।**
**ततस्तद्वशात् काले प्रवर्षति दिवाकरः।।**
**यत्तु मेघैः समुत्सृष्टं वारि तत्प्राणिनां द्विज।**
**पुष्णात्यौषधयः सर्वा जीवनायामृतं हि तत्।**
**आदत्ते रश्मिभिर्यत्तु क्षितिसंस्थं रसं रविः।**
**तमुत्सृजति भूतानां पुष्ट्यर्थं सस्यवृद्धये।।**
**तेन प्रीणात्यशेषाणि भूतानि भगवान् रविः।**
**देवपितृमनुष्याणां देवमाप्याययत्यसौ।।**[5]

सूर्यः अष्टौ मासान् रश्मिभिः रसरूपजलं पृथिव्याः गृहीत्वा वर्षाकाले विमुञ्चति। अनल्पाधिकवर्षापरिमाणेन प्रजाः अविक्लवाः जीवन्ति । किन्तु सूर्यचक्रे खगोलीयभौगोलिककारणानि यदा वर्षाचक्रे प्रतिकूलप्रभावमुत्पादयन्ति तदा जलदोषाः जायन्ते। क्वचिदधिकपरिमाणे अकाले वा वर्षा जायते येन जलौघादय ईतयो जायन्ते क्वचिच्च जनसङ्ख्यानुपातेन अत्यल्पा वर्षा जायते, येन जनाः ओषधीनामभावेन क्षुत्पिपासापीडिताः भवन्ति। तेषां जीवनञ्च दुर्भरं भवति। एते अनावृष्ट्यतिवृष्ट्यौ वर्षावितरणस्य अङ्गभूते पृथिव्यां स्थानभेदेन जायेते। कालचक्रेण कदाचित् आन्तरिक्षपार्थिवकारणैः जलप्लावनं भवति, येन पृथिवी जलक्लिन्ना भवति।

वैदिकमतानुसारेण पर्जन्यस्य एकं रूपं वन्ध्यागोवद् भवति अपरञ्च वृष्टि-कारकं भवति। प्रथमरूपम् अनावृष्टेः कारणं भवति अपरं च कदाचित्सामान्या वृष्टिं च जनयति।[6]

**अतिवृष्टिरनावृष्टिः दुर्भिक्षायोभयं मतम् ।**
**नगरादुपसर्पन्ते समीपमुपयान्ति च।**[7]

**2.मेघोत्पत्तिः**

जलपरमाणवो विपरीतक्रमेण सूर्य-रश्म्यातपेन अतिसूक्ष्माः भूत्वा उड्डीयमानाः उपरि आकाशे सूर्य-किरणेषु प्रतिष्ठिताः भवन्ति । तत्र अष्टौ मासं यावत् जलं तिष्ठति ।

ततो वायवीय-आकाशीयतत्त्वानां संघातात् इदमेव सूर्य-किरणस्थजलं पुनः मेघरूपेण इतस्ततो वर्षति । तथा हि तैत्तिरीयसंहितायाम् -

**अग्निर्वा इतो वृष्टिमुदीरयति मरुतः सृष्टां नयन्ति**
**यदा खलु वा असावादित्योऽन्यद् रश्मिभिः**
**पर्यावर्तते अथ वर्षति।**[8]

तथा हि -

**मरुद्भिः प्रच्युता मेघाः वर्षन्तु पृथिवीमनु।**[9]

वस्तुत आकाशस्थं सूर्यकिरणस्थं वा जलं वायुः दधाति। ततः वायोः भार-वहनशक्तितः अधिकं जलं यदा संगृहीतं भवति एवं अन्यानि वृष्ट्युत्पादकानि कारणानि उपस्थितानि भवन्ति चेत् वृष्टिः भवति ।

**3. वृष्टिविचारः ( गर्भसम्भवः वृष्टिपातश्च )**

यथा प्राणिषु गर्भधारणस्य ततः प्रसूतेः विचारो भवति तथैव वृष्टिविचारेऽपि अयमेव क्रमः। यदि मेघेषु सम्यक्तया गर्भाधानं न भवति चेत् वृष्टिरपि समीचीना न भवति एवं तद्विपरीते सति सुवृष्टिर्जायते । तदेव सङ्केतयति आदिकविः वाल्मीकिश्च रामायणे-

**अष्टमासधृतं गर्भं भास्करस्य गभस्तिभिः ।**
**रसं सर्वसमुद्राणां द्यौः प्रसूते रसायनम् ।।**[10]

सूर्यकिरणैः अष्टौ मासान् यावत् (कार्तिक शुक्ला प्रतिपदातः आषाढ शुक्लप्रतिपदां यावत्) निखिलार्णवरसायनरूपं जलं गर्भरूपेण दधदयम् आकाशः प्रसूते अर्थात् प्रवर्षति ।

**4.वर्षायाः ज्ञानार्थं चतुर्विधानि निमित्तानि-**

1. **भौमम्** - पशु-पक्षि-कीट-पतंग-मनुष्याणां क्रिया-कलापैः ।
2. **आन्तरिक्षम्** - वायु-मेघ-विद्युत्-गर्जन-सन्ध्या-दिग्दाह-प्रतिसूर्य-गन्धर्वनगर-निर्घातादिभिः ।
3. **दिव्यम्** - सूर्य-चन्द्र ग्रहणैः, ग्रहाणाम् उदयास्त-संक्रान्तिभिः, सप्तनाडीचक्रप्रभृतिभिः ।
4. **मिश्रम्** - शकुनैः ।

एतानि निमित्तानि क्रमशः बलवत्तराणि भवन्ति ।

5. **गर्भधारणात् प्रसव**-(वृष्टि-)कालविचारः

**यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत् स चन्द्रवशात् ।**
**पञ्चनवतेः दिनशते तत्रैव प्रसवमायाति ।।**

अर्थात् यस्मिन् नक्षत्रे गर्भधारणं तस्मात् प्रायः सार्धषण्मासानन्तरम् १९५ दिनानन्तरं यदा तस्मिन्नेव नक्षत्रे चन्द्रः अष्टमीम् आवृत्तिं करोति तदा प्रसवः (वृष्टिः) भवति ।

गर्भधारणकालात् प्रसवकालस्य ज्ञानाय एका तालिका स्थाप्यते येन इदं ज्ञानं सरलतया कर्तुं शक्यते यत् कालविशेषे यदि गर्भस्य धारणं संभवति अर्थात् मेघनिर्माणं भवति चेत् तदा तस्य प्रसवः अर्थात् वर्षणं संभवति ।

**गर्भधारणकालात् प्रसव-( वृष्टि- ) कालबोधकतालिका -१**

| गर्भधारणम् | प्रसवः |
|---|---|
| शु | कृ |
| कृ | शु |
| दिन | रात्रि |
| रात्रि | दिन |
| प्रातः सन्ध्या | सायं सन्ध्या |
| सायं सन्ध्या | प्रातः सन्ध्या |

**6. नक्षत्रवशात् वृष्टिविचारः**

नक्षत्राधारेण वृष्टेः विचारः संहिताग्रन्थेषु उपलभ्यते । तत्र संपूर्णेषु सप्तविंशतिनक्षत्रेषु अन्यतमे नक्षत्रे चन्द्रस्य स्थितिवशात्, आर्द्रायां सूर्यस्य स्थितिवशात् एवं नक्षत्राधारित-सप्तनाडीचक्रवशाच्च वर्षायाः फलादेशो विधीयते सांहितिकैः । तत्र उक्तानां समेषां तु अत्र उपस्थापनं न कर्तुं शक्यते किन्तु दिङ्मात्रं केषुचिद् भेषु स्थितिवशात् वृष्टेः यत् स्वरूपम् वर्ण्यते ग्रन्थेषु तदत्र सरलतया अवगमनाय तालिकाभिः प्रस्तूयते ।

**नक्षत्रवशात् अतिवृष्टि-अल्पवृष्टिबोधकतालिका**

| | |
|---|---|
| रोहिणी | अतिवृष्टिः |
| पू भा | अतिवृष्टिः |
| पू.षा. | अतिवृष्टिः |
| उ.षा. | अतिवृष्टिः |
| उ भा | अतिवृष्टिः |
| आर्द्रा | अल्पवृष्टिः |
| आश्लेषा | अल्पवृष्टिः |
| मघा | अल्पवृष्टिः |
| स्वाती | अल्पवृष्टिः |
| शतभिषा | अल्पवृष्टिः |

मार्गशीर्षमासात् आरभ्य ६ मासेषु आर्द्रादि ५ नक्षत्रेषु गर्भः स्यात् तर्हि –

मार्गशीर्षे – ८ दिनानि वृष्टिःपौषे –६ दिनानि वृष्टिः

माघे –१६ दिनानि वृष्टिःफाल्गुने – २४ दिनानि वृष्टिः

चैत्रे –२० दिनानि वृष्टिःवैशाखे – ३ दिनानि वृष्टिः

**वृष्टिबोधकं सप्त-नाडी-चक्रम्**

| नाडी | स्वामी ग्रहः | नक्षत्रम् | फलम् |
|---|---|---|---|
| चण्डा | श | कृ–विशा -अनु–भर | प्रचण्डवायुः |
| वाता | सू | रो - स्वा -ज्ये–अश्वि | तीव्रवायुः |
| दहना | मं | मृग - चि–मू–रेव | घम |
| सौम्या | गु | आर्द्रा- हस्त–पूषा–ऊभा | मेघाः |
| नीरा | शु | पुन -ऊफा–ऊषा–पूभा | जलोपेताः मेघाः |
| जला | बु | पु- पूफा–अभि–शत | सामान्यवर्षा |
| अमृता | च | आश्ले–मघा–श्रव–धनि | अतिवृष्टिः |

**समीक्षा**

अन्नं जगतः प्राणाः यस्योत्पत्तये कारणीभूता वृष्टिरेव। यावता वृष्टिविचारः न क्रियते तावता कृषिकर्म साफल्यम् नैति ।ज्योतिषशास्त्रे वृष्टेः भृशं विचारः कृतो विद्यते ।तत्र संहिताग्रन्थेषु विशिष्य बृहत्संहितायां वृष्टिविचारः विशदतया कृतो विद्यते, यत्रादावेव गर्भलक्षणाध्याये वृष्टेः महत्त्वं प्रतिपादयता वराहेण अभाषि –

वृष्टिमूला क्रियाः सर्वाः वृष्टिमूलं च जीवनम् ।

तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत् ।।

अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम् ।

यस्मादतः परीक्ष्यः प्रावृट् कालः प्रयत्नेन ।।

1. बृ.सं १/२

२ बृ.सं गर्भलक्षणाध्यायः, १–२

3 वाल्मीकिरामायणम्, ४/२८/३१

4 मनुस्मृतिः, ३/७६

5 विष्णुपुराणम्द्वितीयस्कन्धः, अ. ९ श्लोकसं १८–२२ तथा तत्रैव, अ. ११ श्लोकसं २४–२६

6 स्तरीयरुत्वद्भवति सूत उत्रत्यथावशं तन्वं चक्र एषः। – ऋग्वेदः७६.१०१.३

7 अग्निपुराणम्– १३६.१९–२०

8 तै.सं. २/४/१०

9 अथर्व. ४/१५/७

10 वाल्मीकिरामायणम्, उत्तरकाण्डः, ५/१५

11 बृ.स. गर्भलक्षणाध्यायः, १–२

**केन्द्रीयसंस्कृतविश्वविद्यालयः**

**देहलीपरिसरःनईदिल्ली**

**9929220261**

# संस्कृतसप्ताहः

❑ डॉ. सोहन लाल मीना

प्रतिवर्षं 'श्रावणपूर्णिमादिनं संस्कृतदिनत्वेन आचर्यते। 1969 तमात् वर्षाद् आरभ्य श्रावणपूर्णिमा 'संस्कृतदिनत्वेन आचर्यते। ततः पूर्वं भवं दिनत्रयं, तदनन्तरभवं दिनत्रयं च संयोज्य सप्ताहात्मकः कालः संस्कृतसप्ताहत्वेन आचर्यते।

अद्यत्वे नूतनशैक्षणिकवर्षस्य आरम्भो देशे क्वचित् जूनमासे, क्वचित् जुलैमासे, क्वचिच्च अगस्त्मासे च भवति। किन्तु प्राचीनकाले नूतनशैक्षणिकवर्षारम्भः श्रावणपूर्णिमादिने भवति स्म प्रायेण। अत एव श्रावण पूर्णिमादिनस्य 'संस्कृतदिन' त्वेन आचरणम् आरब्धम्। 2002 तमे वर्षे केन्द्रसर्वकारेण सूचितं यत् श्रावण-पूर्णिमायुक्तः सप्ताहः संस्कृतसप्ताहत्वेन आचरणीयः इति। (No. F-11-2/2001 SKT.II dated 3.7.2002) तत आरभ्य संस्कृतसप्ताहाचरणपरम्परा आरब्धा।

अमेरिकादिषु देशेषु संस्कृतदिनं 'विश्वसंस्कृतदिन' त्वेन आचर्यते कैश्चित्।

श्रावणपूर्णिमा भवति प्रायः अगस्त्मासे। अगस्त्मासे एव स्वातन्त्र्यदिनाचरणम् अपि प्रचलति। तदवसरे दशाधिकेभ्यः संस्कृतविद्वद्भ्यः 'राष्ट्रपति-पुरस्कारः' उद्घोष्यते प्रतिवर्षम्।

आषाढपूर्णिमा गुरुपूर्णिमात्वेन, श्रावणपूर्णिमा रक्षाबन्धनोत्सवत्वेन च आचर्यते देशे। यथा चोक्तम्-

**रक्षाबन्धनपर्व एतद्, रक्षाबन्धनपर्व।**
**मानवधार्मिकमूल्यं भजतां, सर्वैश्वर्यसमृद्धिदमेतत्।**
**साहोदर्यहृदं जागर्ति, सद्भावनया उल्लसति।**
**श्रावणमासे पूर्णिमादिने, पर्वाचरणं सर्वत्र।।**
**अस्मद्देशे तथा विदेशे, कुर्वन्ति जनाः सानन्दम्।**
**भ्रातृभगिन्योः स्नेहभावः, दृढतां गच्छति पर्वणा।।**
**रक्षाबन्धनरूपा रक्षा, भगिनीभिः क्रियतेऽत्र सादरम्**
**भ्रातरोऽपि बहुधादरपूर्वं, मानयन्ति भगिनीश्च सहर्षम्।।**
**वयं हि भारतदेशीयाः, प्रदर्शयाम एकताम्।**
**संस्कृतेश्च संरक्षका अपि, श्रेष्ठं राष्ट्रं रचयाम।इति।।**

1994 तमे वर्षे संस्कृतदिनावसरे (अगस्त्मासस्य 21 तमे दिनाङ्के) दूरदर्शनमाध्यमेन संस्कृतवार्ताप्रसार आरब्धः। आकाशवाणीमाध्यमेन तु संस्कृतवार्ताप्रसारस्य आरम्भः कृतः 1974 तमे वर्षे जून् मासस्य त्रिंशतमे दिनाङ्के। इदानीं दिने द्विः संस्कृतवार्ताप्रसारः क्रियते।

अस्माभिः संस्कृतज्ञैः संस्कृतकार्यकर्तृभिश्च अवसरमेनम् सदुपयुक्तं कुर्वद्भिः संस्कृतस्य प्रसाराय नैकविधाः कार्यक्रमाः चिन्तनीयाः।

अस्मिन् वर्षे अगस्त्मासस्य 22 तमे दिनाङ्के श्रावणपूर्णिमाऽभवत्। तन्नाम 19-08-2021 तः 25-08-2021 पर्यन्तं सप्ताहं यावत् संस्कृत-सप्ताहस्य आचरणं विहितम्। कार्यकर्तृभिः अस्माभिः तदवसरे एतादृशाः केचन कार्यक्रमाः आयोजिताः-

प्रतिमण्डलं प्रतिनगरं प्रतिग्रामञ्च धार्मिक-शैक्षणिक-सांस्कृतिकसंस्था भवन्ति। तासां सहयोगेन सार्वजनिक: कार्यक्रम: आयोजनीय:, यत्र गृहीतभागा: जना: संस्कृतस्य महत्त्वम् आवश्कतां च जानीयु:। तादृशीषु संस्थासु एका एकस्मिन् दिने कार्यक्रमम् आयोजयेत्।

कार्यक्रम: नगरस्य, मण्डलस्य ग्रामस्य च भिन्नेषु भिन्नेषु भागेषु आयोजितोऽभवत् तेन बहव: जना: तत्र भागं ग्रहीतुं शक्ता अभवन् संस्कृतसप्ताहावसरे जनानां मध्ये संस्कृतवार्ताविषय: यथा भवेत् तथा करणीयम्। तदर्थं तेषु दिनेषु बह्वीषु पत्रिकासु संस्कृतविषयका: लेखा: प्रकाशिता: अभवन्।

कार्यकर्तृगण: यत्र अस्ति तत्र ते गणीया: सर्वे मिलित्वा तस्मिन् सप्ताहे प्रतिदिनं जनसम्पर्काभियानं अकुर्वन्। तत्र पत्राचारमाध्यमेन संस्कृतशिक्षणयोजनाया: संस्कृतपत्र-पत्रिकाया: वा, सरलसम्भाषणोपयोगिनां पुस्तकानां चापि व्यापक: प्रचार: विहित:।

विद्यालयेषु छात्राणां निमित्तं विविधा: स्पर्धा: प्रतियोगिता: वा आयोजिता:। सर्वेषु संस्कृतविद्यालयेषु, पाठशालासु, सर्वेषु सम्भाषणकेन्द्रेषु च कार्यक्रमस्य आयोजनम् प्रायेण जातम्।

विदुषां मेलनं, संस्कृते नाटकानां मञ्चनम्, परिचर्चा, संवादगोष्ठी, संस्कृतगानगोष्ठी, सरलसम्भाषणप्रदर्शनं, प्रदर्शिनी, संस्कृतप्रवास:- इत्यादय: अन्येऽपि बहव: कार्यक्रमा: यथासम्भवमायोजिता इति प्रहर्ष:। यथा-

**संस्कृतं संस्कृतं वदामो वयम्**
**भारतीसंस्कृतं वदामो वयम्।।**
**संस्कृतं संस्कृतं वदामो वयम्**
**भारतीसंस्कृतं नमामो वयम्।। 1।।**
**संस्कृतस्योत्सवं चरामो वयम्**
**देवभाषासुधां पिबामो वयम्**
**यत्र व्याप्तं हि सर्वं जगत्मौलिकं**
**भारतीसंस्कृतं नमामो वयम्।। 2।।**
**शंकरं वासुदेवं नमामो वयम्।**
**जानकीराधिके नता: स्मो वयम्**
**यत्र सर्वं प्रभाभासितं मौक्तिकं**
**भारतीसंस्कृतं नमामो वयम्।। 3।।**
**संस्कृतं भूतले गदामो वयम्।**
**संस्कृतस्योत्सवं कीर्तयामो वयम्**
**संस्कृतं संस्कृतं वदामो वयं**
**भारतीसंस्कृतं नमामो वयम्।। 4।। इति**

गतवर्षापेक्षया अत्यधिकस्थानेषु अधिकवैभवेन संस्कृतसप्ताह: आचरित: यथा भवेत् एतदर्थं कार्यकर्तार: यत्नं कृतवन्त:।

**'सुरससुबोधा विश्वमनोज्ञा ललिता हृद्या रमणीया।**
**अमृतवाणी संस्कृतभाषा नैव क्लिष्टा न च कठिना।।'**

**प्राध्यापक:**
**राजकीय वरिष्ठ उपाध्याय संस्कृत**
**विद्यालय:, रटलाई, झालावाड़ (राज.)**

पुस्तकसमीक्षा

# नूतनः काव्यसङ्ग्रहः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

भारतशासनेन 'पद्मश्री' इत्यलङ्करणेन सभाजितस्य, राष्ट्रपतिसम्मानितस्य, वाराणसेयसंस्कृत-विश्वविद्यालयकुलपतिपदमलङ्कृतवतः कविसार्वभौमस्य विद्वत्प्रवरस्य प्रो. अभिराज-राजेन्द्रमिश्रस्य बहवः संस्कृतकाव्यग्रन्थाः प्रकाशिताः सन्तीति सुविदितं संस्कृतजगति। काव्येष्वेषु प्रमुखतः शार्दूलविक्रीडित-मन्दाक्रान्तोपजातिप्रमुखानि संस्कृतच्छन्दांस्येव प्रयुक्तानि तेन। सपद्येव विद्वद्वर्यस्यास्य संस्कृतेतरच्छन्दःसु व्रजभाषाप्रयुक्तेषु कवित्त-सवैयादिषु निबद्धाः संस्कृत-काव्यरचनाः सङ्कलने एकस्मिन् प्रकाशिता इति विज्ञाय प्रमोदेरन् काव्यरसिकाः।

संस्कृते सहस्राब्दीभ्योऽनुष्टुप्-प्रभृतिषु वार्णिकच्छन्दःसु काव्यरचना क्रियमाणाऽस्ति। वेदेषु त्रिष्टुप् प्रभृतीन्याक्षरिकच्छन्दांसि प्रयुक्तानि दृश्यन्ते। प्राकृतादि-भाषाप्रयुक्तस्य ''गाथा'' ''आर्या'' ख्यस्य मात्रिकच्छन्दसोऽपि प्रयोगः संस्कृतकविभिरकारि किन्तु शताब्दीभ्यो व्रजभाषादिषु प्रयुक्तानां सर्वथा लोकप्रियाणां छन्दसां दोहा-चौपाई-कवित्त-सवैयादीनां प्रयोगः शीर्षस्थैः संस्कृतकविभिर्नैवाऽक्रियत। एवंविधानां मात्रिकच्छन्दसां भूयसी संख्याऽस्ति हिन्दीसाहित्येति-हासविदिता। तुलसीदासविहारि-रसखान-देव-पद्माकरादिभिः स्वकाव्येषु छन्दसामेषामेव प्रयोगः कृतोऽस्ति शताब्दीभ्यो यः कालजयी परिभाष्यते। एतेषु छन्दःसु विपुलसंस्कृत-काव्य-रचना मत्पितृचरणैः स्व. भट्ट श्रीमथुरानाथशास्त्रिभिः मञ्जुनाथ काव्यनामधारिभि-र्विंश्यां शताब्द्यां कृताऽभूत्। साहित्यवैभव-गोविन्द-वैभवादिकाव्यानामेषां संग्रहो ''मञ्जुनाथग्रन्थावली'' नाम्ना देहलीस्थेन केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रकाशितोऽस्ति। तथ्यमिदं प्रो. अभिराज-राजेन्द्रमिश्रेण स्वकाव्यसंग्रहभूमिकायामुल्लिखितमप्यस्ति यद् भट्ट-महोदयैः प्रयुक्तानामेषां छन्दसां नाऽभूत् प्रामुख्येण प्रयोगः परस्तात् संस्कृतकाव्यजयति किन्तु मिश्रवर्यैरेतेषु छन्दःस्वपि संस्कृतकाव्यरचना व्यधायि यतस्ते हिन्द्यादिभाषास्वपि काव्यानि व्यरचयन्।

प्रो. अभिराज-राजेन्द्रमिश्राणां ''**सप्तवेणी**'' शीर्षकवहे नूतने काव्यसंग्रहेऽस्मिन् व्रजभाषा-हिन्द्यादिकाव्येषु निबद्धाः संस्कृतकाव्यरचनाः सङ्कलिताः सन्ति। अतस्त्रिवेणी कविवर्येणाऽनेन काव्यसंग्रहस्यास्याऽभिधानं ''सप्तवेणी'' ति विहित-मस्ति। छन्दसामेषां नामान्यपि कविवर्येण संस्कृती-कृतानि। सवैया इत्यस्य नाम **सपादिका**, घनाक्षरी (कठिन) इत्यस्य नाम **घनाक्षरिका**, दोहा इत्यस्य नाम **दोधकम्**, सोरठा इत्यस्य नाम **सौराष्ट्रकम्**, बरवै इत्यस्य नाम वरवृत्तम्, छप्पय इत्यस्य नाम षट्पदम्, कुण्डलिया इत्यस्य नाम च **कुण्डलिका** इत्याख्यातमत्र कविवर्येण। एतेषु छन्दःसु विरचिताः काव्यरचना विविधान् विषयान् स्पृशन्ति। अन्योक्तयः, स्तुतयः, ऋतुवर्णनम्, नीतिकाव्यानि, कविवृत्तम्, लोकवृत्तम् इत्यादयो विषया विनिबद्धाः सन्ति छन्दःस्वेतेषु। छन्दसामेषां सोऽयं विशेषस्तु सुविदित एव यदेतेषु सर्वत्र ''अन्त्यानुप्रासः'' (तुकान्त) अनिवार्यरूपेण प्रयुज्यते। अनेन काव्यस्य रोचकता प्रवर्धत इति तु स्पष्टमेव किन्तु रचनाकारस्य कृते किञ्चन काठिन्यमवश्यमेवोपतिष्ठते। संस्कृतच्छन्दःसु नाऽस्ति तदिदं बन्धनमन्त्यानुप्रासस्य।

**सुधार**: भारत्या गतेऽङ्के (71/10) पुस्तकसमीक्षायाः 27 तमे पृष्ठे अनवधानवशात् सेयं त्रुटिरभूद् यदेकं पृष्ठं द्विर्मुद्रितमभूत् (पृ. 26), एकं पृष्ठं (27) नाऽभून्मुद्रितम्। अतोऽस्मिन्नङ्के तस्य पुस्तकद्वयस्य समीक्षा पुनः प्रकाश्यते। असुविधामिमां पाठकाः क्षमिष्यन्तीत्याशास्यते। *-प्रधानसम्पादकः*

सोरठाख्ये छन्दसि तुकान्ताख्योऽनुप्रासश्चरणान्ते न प्रयुज्यते, चरणमध्ये प्रयुज्यते इत्यपि सुविदितम्। यथा काव्यसंग्रहेऽस्मिन् सङ्कलिते वसन्तवर्णने प्रथमं सौराष्ट्रकमेवमस्ति-

**वनभुवि लसति वसन्त उडुपतिरिव नीले नभसि।**
**आवक्ष्यते नु हन्त! विविधसमृद्धिसमृद्ध इह।।**

इत्थं सप्तसु छन्दःसु विनिबद्धाः पञ्चविंशतिकाव्य-रचनाः सङ्कलिताः सन्ति सप्तवेण्याम्। संग्रहस्यास्य प्रधानसम्पादकरूपेण देहलीस्थ-राष्ट्रिय-संस्कृत संस्थानस्य (केन्द्रीय विश्वविद्यालयस्य) कुलपतिवर्याणां प्रो. परमेश्वरनारायणशास्त्रिणां नाम मुखपृष्ठे प्रकाशित-मस्ति। भूमिकायां च काव्यप्रणेतृवर्येण स्पष्टीकृतमस्ति यदेतेषु सानुप्रासेषु मात्रिकच्छन्दःसु काव्यरचना असिधाराव्रतमेवाऽस्ति यतो मात्रा-यति-गतीनामनु-प्रासादीनां चावधानं सुतरामावश्यकमत्र।

सुप्रथितस्य कविवर्यस्य नूतने छन्दःसप्तके विनिबद्धानां काव्यरचनानामयं संग्रहः सर्वविधानां पाठकानां मनांसि प्रसादयिष्यतीति विश्वसिमोऽभि-नन्दामश्च कविसार्वभौमं प्रो. अभिराज राजेन्द्रमिश्रम्।

**सप्तवेणीः कविः प्रो. अभिराज राजेन्द्रमिश्रः प्रकाशक राष्ट्रियसंस्कृतसंस्थानम् 56-57 इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली-58, पृ.सं. 116, मू. 165/-**

## नूतनः कथासंग्रहः

वाराणसेयस्य विदुषो डॉ. गायत्रीप्रसादपाण्डेयस्य नूतनः कथासंग्रहः सपद्येव प्रकाशितोऽस्ति ''कथास्तबक'' शीर्षकवहः। अत्र हि चतुर्दश कथाः प्रकाशिताः सन्ति या विविधानि विषयवस्तून्युपहरन्ति विविधान् परिवेशांश्च प्रतिनिदधति। प्रथमा कथा सुप्रथितं सङ्गीतकारं तानसेनमवलम्ब्य निबद्धाऽस्ति यत्र तानसेनस्य मूलनाम ''तनसुख'' इति सूचितमस्ति, अकबरस्य नवरत्नेषु कथमयं नवमं रत्नत्वमापेदे, गुरु-वर्यस्य सुप्रथितसन्तहरिदासस्यानुग्रहमाससाद इत्यादि वर्णितं कथायाम्। अन्याः कथाः प्रायश आधुनिक-कालीनाः सन्ति, परितापः, मशकार्थो धूमः, महालया इत्यादिशीर्षकवहाः कथा आधुनिकसमाज-चित्रणपराः सन्ति।

आधुनिककालीनविश्वविदिता भयातिशयवहा घटनाऽस्ति वैश्विकी महामारी ''कोरोना'' इत्याख्या। तस्याश्चित्रणं यथा विविधासु भाषासु निबद्धे साहित्ये समुपलभ्यते तथैव संस्कृतभाषाऽपि तां वर्णयतीति सुस्पष्टमाधुनिकसंस्कृतलेखने। तदिदं संस्कृतभाषां प्राचीनतमां नवीनतमां च भाषां प्रमाणयति। संस्कृतकाव्यरचनासु कथासु च पठन्त्येव पाठकाः कोरोना (कोविड19) काण्डम्। अस्मिन् कथा-संग्रहेऽपि कथैका कोरोनामुपनिबध्नाति-कोरोना-पराजयः (कोविड 19) अपरा कथा ''गवां गोष्ठी'' मनोरञ्जकं विषयवस्तु वातावरणं च प्रस्तौति। आधुनिककाले गोरक्षणस्य शासकीयव्यवस्थाऽप्यत्र सङ्केतिता, वस्तुस्थितिरपि चित्रिता।

कथाकारस्य पाण्डेयवर्यस्य काव्यरचनानां कथानां च संग्रहाः पूर्वमपि प्रकाशिताः समये समये पुरस्कृताश्चेति सूचना लेखकपरिचये द्रष्टुं शक्यते। आकाशवाणी-प्रसारणस्यापि विपुलोऽनुभवोऽत्र सूचितः। द्वासप्ततिवर्ष-वयस्कस्य विद्वद्वर्यस्य नूतनोऽयं कथासंग्रहः पाठकानां हृदयावर्जकः सेत्स्यतीति विश्वसिमः, सहर्षं वर्धापयाम-श्चैनम्।

**कथास्तबकः - ले. डॉ. गायत्रीप्रसाद पाण्डेय, सम्पादिका डॉ. सुधा त्रिपाठी, प्रकाशक, शारदा संस्कृत, संस्थान, बी, 21/40 कमच्छा वाराणसी, पृ.सं. 120 मू. 250/-.**

संस्कृतसमाचाराः

## 'पं. मधुसूदन ओझाप्रतिपादितं वृष्टिविज्ञानम्' इति विषयमधिकृत्य राष्ट्रिया संगोष्ठी सम्पन्ना

जयपुरम् (राजस्थानम्) महामहोपदेशक-समीक्षाचक्रवर्त्ति-पं. मधुसूदन ओझा महाभागानां जन्म महोत्सवस्य शुभावसरे जन्माष्टमीदिवसे (अगस्त-मासस्य त्रिंशत्तमे दिनाङ्के) विश्वगुरुदीप आश्रम शोध-संस्थानजयपुरस्य तत्त्वावधाने डॉ. राधाकृष्णन् केन्द्रिय-पुस्तकालयस्य सभागारे समायोजिता 'पं. मधुसूदन ओझाप्रतिपादितं वृष्टिविज्ञानम्' इतिविषयिणी राष्ट्रिया संगोष्ठी सुसम्पन्ना। संगोष्ठ्या आध्यक्ष्यं डॉ. सर्वपल्ली-राधाकृष्णन् राजस्थान आयुर्वेदविश्वविद्यालयजोधपुरस्य पूर्वकुलपतिभिः प्रो. बनवारीलालगौडमहोदयै-र्निर्वोढम्। राजस्थानसर्वकारस्य 'कला एवं संस्कृतिविभागस्य' संयुक्तशासनसचिवाः श्रीयुत पंकज ओझामहोदयाः मुख्यातिथय आसन्। राजस्थानसंस्कृत अकादम्याः पूर्वाध्यक्षा प्रो. सुषमासिंघवी महोदया, 'श्रीसंजयशर्मा संग्रहालय एवं शोधसंस्थान' स्य सचिवाः श्रीतिलकशर्माणश्च विशिष्टातिथयः आसन्। संगोष्ठ्यां मुख्यवक्तारः आसन् - पं. मधुसूदन ओझाशोधपीठ-जयनारायणव्यासजोधपुरविश्वविद्यालयस्यपूर्वनिदेशकाः प्रो. नरेन्द्र अवस्थी महोदयाः, विश्वगुरुदीप आश्रम शोधसंस्थानजयपुरस्य वेदविज्ञानविभागाध्यक्षाःप्रो. रामदेवसाहू महोदयाः, केन्द्रीयसंस्कृतविश्वविद्यालय-जयपुरस्य ज्योतिषविभागाध्यक्षाः प्रो. श्यामदेवमिश्र महोदयाः, राजस्थानविश्वविद्यालयजयपुरस्य पूर्व-विभागाध्यक्षाः प्रो. राजेन्द्रप्रसादशर्माणः, जगद्-गुरुरामानन्दाचार्य-राजस्थानसंस्कृतविश्वविद्यालय-स्य वेदविभागस्य सेवानिवृत्त-आचार्याः प्रो. लम्बोदरमिश्र महाभागाश्च। राजस्थानसंस्कृतशिक्षाविभागस्य पूर्व-निदेशकाः प्रो. कैलाशचतुर्वेदिनः, राजस्थानसंस्कृत अकादम्या निदेशकाः श्रीसंजयझाला चापि संगोष्ठ्याम् उपस्थिता आसन्। महन्तहरिशंकरदासवेदान्तिना-माशीर्वचनेन संगोष्ठ्याः समापनं विहितम्। संगोष्ठ्याः संचालनं डॉ. चन्द्रप्रकाशशर्मा - डॉ. रघुवीरप्रसादश्च कृतवन्तौ।

राष्ट्रियसंगोष्ठ्यामस्यां वृष्टिविज्ञानसन्दर्भे पं. मधुसूदन ओझाविरचिताया कादम्बिन्या अम्भोवादग्रन्थस्य च विशिष्टसिद्धान्तानां मीमांसां विधाय विद्वद्भिः-वृष्टिप्रक्रियासन्दर्भे नूतनमनुसंधानं प्रस्तुतम्। गर्भधारण-गर्भदोहद-गर्भप्रसव-गर्भपरीक्षणादिविषयाणां गभीर-चिन्तनेन सह ग्रहनक्षत्रादियोगानां विविधभौगोलिक-प्राकृतिकनिमित्तानां एतत्सन्दर्भितोपयोगिताविषये विदुषां विचाराः वस्तुतः प्रशस्या आसन्। आधुनिकमौसम-विज्ञानस्य कार्यशैल्या तुलनया पं. ओझाप्रतिपादित-प्रक्रियाया वैज्ञानिकतां प्रतिपाद्येदं संसाधितं यत्प्राक्तनमिदं विज्ञानमाधुनिकविज्ञानेन न्यूनतरं नास्ति।



- सुदामा शर्मा
प्रबन्धसम्पादकः

नारीस्तम्भः

# कोऽतिभारः समर्थानां

❑ प्रो. राजेश्वरी भट्ट

गौरवस्य विषयोऽयं वर्तते यत् 23.7.2021 तः 8.8.2021 दिनाङ्कं यावत् समायोजिते 'टोक्यो ऑलम्पिक' इति विश्वक्रीडासमारोहे प्रथमदिवस एव भारतपुत्री, शक्तेः प्रतिमूर्तिः सुश्रीः मीराबाईचानू भारोत्तोलनप्रतिस्पर्द्धायां 49 किलो परिमितं भारं उत्थाप्य विश्वे विश्रुता जाता। असाधारणसामर्थ्यसम्पन्ना, असम्भवं सम्भवं कुर्वती, मणिपुरप्रान्ते एकस्मिन् ग्रामेऽति-साधारणपरिवारे 1994 तमे रिव्रष्टाब्दे जनिमलभत। अष्टसदस्यानां परिवारोऽयं अर्थसंकोचेन यथाकथञ्चिद् जीवनमत्यवाहयत्। गृहे भोजनादीनां निर्माणाय काष्ठाहरणाय वने प्रस्थितानां षड् भ्रातृभगिनीनां मध्ये मीराबाई एव सर्वाधिकस्य भारस्योत्थापने सक्षमाऽभवत्। नित्यं भारोत्थापनस्य अभ्यासेन शनैः शनैः भारोत्तोलनकर्मणि मीराया रुचिरवर्धत। अस्मिन् क्रमे कदाचित् पित्रा सह मणिपुरं प्रस्थिता बालिका मीरा एकस्मिन् कार्यक्रमे भारोत्तोलनकर्मणि कुशलायाः **'कुंजो रानी'** इति प्रशिक्षिकाया भारोत्तोलनकौशलं प्रत्यक्षं कृतवती। तदाप्रभृति भारोत्तोलनकर्मणि नैपुण्यमधिगन्तुं मीरा दृढाग्रहग्रहिला जाता। यद्यपि अतिसामान्य- परिवारस्य बालिकाया कृते व्ययोन्मुखिनं भारोत्तोलनस्य प्रशिक्षणं प्राप्तुं, एवमेव गृहाद् दूरतरे कुंजोरानी महाभागायाः सन्निधौ गमनं सहजं नासीत्, तथापि मीरायाः पिता बालिकाया मनोरथं पूरयितुं यथाशक्यं प्रायतत। प्रशिक्षिकायाः कुंजोरानी महाभागायाः छत्रच्छायायां भारोत्तोलनकर्मणि उत्तरोत्तरं नैपुण्यमधि-गच्छन्ती 'मीराबाईचानू' सम्प्रति अनेकासु भारोत्तोलन-स्पर्द्धासु एकतमाऽभवत् सहैव आत्मनः कौशलेन कीर्तिमलभत। एकादशवर्षीया मीराबाई स्थानीय-भारोत्तोलनप्रतियोगितायां स्वर्णपदकं प्राप्य आत्मनः शक्तेः साहसस्य स्वरूपमुद्घाटितवती। अनेन विजयेनोत्साहिता, सततमग्रेगच्छन्ती 'मीराबाईचानू' 2014 तमे खिष्टाब्दे **'ग्लासगो'** इति स्थाने सम्पन्नायां 'कॉमनवेल्थ प्रतियोगितायां' 48 किलो परिमितं भारं उत्थाप्य रजतपदकं विजितवती। आरोहणं हि जीवन-लक्ष्यं इति समर्थयन्ती 'मीराबाईचानू' 2016 तमे वर्षे गुवाहाटी प्रदेशे समायोजितायां **'दक्षिण एशिया गेम्स'** इति प्रतियोगितायां स्वर्णपदकं विजित्य राष्ट्रस्य गौरवमवर्द्धयत्। 2016 तमे वर्षे सम्पन्नाया 'रियोऑलम्पिक' प्रतियोगितायाः कृतेऽपि 'मीराबाई' प्रतिभागिनी रूपेण चयनिता जाता किन्तु दौर्भाग्येन मीराबाई अत्र साफल्यं नाधिगतवती। इयं अप्रत्याशिता दुर्घटना मीराबाई कृते भूकम्पकल्पाऽऽसीत्। किन्तु अङ्गीकृतं सुकृतिनः परिपालयन्ति, इति ध्यायन्ती मीराबाई शक्तिं साहसञ्च संचित्य पुनर्लक्ष्यं प्रति उन्मुखा जाता, 22 वर्षस्य वयसि 2017 तमे वर्षे 'वर्ल्डवेट लिफ्टिंग चैम्पियनशिप' इति स्पर्द्धायां मीराबाईचानू आत्मनः दृढ़ संकल्पेन अतीतस्य कृष्णकथां विस्मृत्य शक्तिं प्रदर्श्य स्वर्णपदकं प्राप्तवती। किमधिकं अस्यां प्रतियोगितायां साफल्यमधिगन्तुं मीराबाई आत्मनः प्रियायाः सहोदराया विवाहसमारोहेऽपि सम्मिलिता न जाता। भारोत्तोलनक्षेत्रे प्रथिता 'मीराबाईचानू' 2018 तमे वर्षे नारीशक्तेःप्रतीकरूपेणाभिज्ञाता। मीराबाईचानू आत्मनः चमत्कृतिं जनयती भारोत्तोलनकौशलेन कॉमनवेल्थगेम्स इति स्पर्द्धायां **स्वर्णपदकं** प्राप्य

राष्ट्रकीर्तिमकलयत्। अनेनाभूतपूर्वविजयेन गौरवान्वितेन मणिपुरस्य मुख्यमन्त्रिणा मीराबाईचानू प्रभूतेन धनराशिना पुरस्कृता। अस्मिन् वर्ष एव राष्ट्रपतिना रामनाथकोविंदमहोदयेन मीराबाई **'पद्मश्री'** इति दुर्लभपुरस्कारेण पुरस्कृता। मीरायाः सौभाग्यरूपेण फलितेऽस्मिन् वर्ष एव मीराबाईचानू क्रीड़ाक्षेत्रे राष्ट्रस्य सर्वोच्च **'राजीवगांधी खेलपुरस्कारेण'** पुरस्कृता जाता। सम्प्रति 'टोक्योऑलम्पिक 20' इति प्रतियोगितायां 49 किलो परिमितभारं उत्थाप्य मीराबाईचानू विश्वे विजयपताका-मुदतोलयत्। मीराबाईचानू-महाभागाया अकल्पनीयेन प्रदर्शनेन गौरवान्वितस्य प्रधानमंत्रिमहोदयस्य आशीर्वचनान्य-त्रोल्लेखनीयानि सन्ति 'हमे ही नहीं बल्कि देश के सभी लोगों को मीराबाई चानू के ऊपर गर्व है। मीराबाईचानू ने वह कर दिखाया है जो आज तक किसी महिला ने नहीं किया है।' शक्तिमती 'मीराबाई चानू' असंशयेन न केवलं नारीणां कृते अपितु राष्ट्रस्य कृते प्रेरणास्रोतो वर्तते।

*<u>हिन्दी अनुवाद</u>*

गौरव का विषय है कि 23 जुलाई 2021 से 8 अगस्त 2021 तक समायोजित 'टोक्यो ऑलम्पिक' विश्व क्रीड़ा महोत्सव के प्रथम दिन ही, भारतपुत्री, शक्ति की प्रतिमूर्ति सुश्री 'मीराबाईचानू' भारोत्तोलन प्रतियोगिता में 49 किलो का भार उठाकर विश्व में विख्यात हो गई। असाधारण सामर्थ्य से सम्पन्न, असम्भव को सम्भव करने वाली मीराबाई ने मणिपुर के एक गांव में अत्यन्त साधारण परिवार में 1994 में जन्म लिया। आठ सदस्यों वाला परिवार धन के अभाव में जैसे तैसे जीवन व्यतीत कर रहा था। घर में भोजनादि के निर्माण के लिए लकड़ी लाने के लिए जंगल में जाने वाले 6 भाई-बहिनों में मीराबाई ही सबसे अधिक भार उठाने में सक्षम थी। नित्य ही भार उठाने के अभ्यास से धीरे-धीरे मीरा की रुचि भारोत्तोलन में बढ़ने लगी। इसी क्रम में कदाचित् पिता के साथ मणिपुर में एक कार्यक्रम में मीराबाई ने भारोत्तोलन क्रिया में अत्यन्त निपुण प्रशिक्षिका कुंजोरानी का भारोत्तोलन कार्यक्रम देखा। उसी दिन से मीराबाई चानू भारोत्तोलन विषय में निपुणता प्राप्त करने के लिए दृढ़ संकल्पवती हो गई। यद्यपि अतिसामान्य परिवार की बालिका के लिए व्ययोन्मुखी भारोत्तोलन प्रशिक्षण प्राप्त करना तथा घर से दूर कुंजोरानी के पास पहुँचना आसान नहीं था तथापि मीराबाई के पिता ने पुत्री की इच्छा पूरी करने के लिए यथाशक्ति प्रयत्न किया। भारोत्तोलिका कुंजोरानी की छत्रछाया में उत्तरोत्तर नैपुण्य प्राप्त करती हुई मीराबाई चानू अब अनेक भारोत्तोलन स्पर्द्धाओं में प्रतिभागिनी होकर अपनी प्रतिभा का प्रदर्शन करने लगी। ग्यारह वर्ष की अवस्था में ही मीराबाई चानू ने स्थानीय भारोत्तोलन प्रतियोगिता में स्वर्ण पदक प्राप्त कर अपनी शक्ति एवं साहस का स्वरूप उद्घाटित किया। इस विजय से उत्साहित, सतत सफलता के सोपान पर बढ़ती हुई मीराबाई चानू ने 2014 में **ग्लासगो** में सम्पन्न होने वाली कॉमनवेल्थ प्रतियोगिता में 48 किलो भार उठाकर रजत पदक प्राप्त किया। 'उन्नति ही जीवन का लक्ष्य है', यह मानने वाली मीराबाई चानू ने विजय शृंखला को आगे बढ़ाते हुए 2016 ई. में गुवाहाटी राज्य में आयोजित 'दक्षिण एशिया गेम्स' प्रतियोगिता में स्वर्णपदक प्राप्त कर राष्ट्र को गौरवान्वित किया। पुनः 2016 में सम्पन्न 'रियो ओलम्पिक' प्रतियोगिता के लिए भी मीराबाई चानू का नाम चयनित हुआ किन्तु दुर्भाग्य से मीराबाई इस स्पर्द्धा में सफलता प्राप्त नहीं कर सकी। यह अप्रत्याशित असफलता मीराबाई चाने के लिए भूकम्प के समान हिला देने वाली थी। किन्तु 'सत्पुरुष स्वीकार किये हुए

का पालन करते हैं' इस तथ्य को मन में रखकर मीराबाई शक्ति और साहस बटोरकर अपने लक्ष्य की ओर अग्रसर हो गई। 22 वर्ष की उम्र में 2017 ई. में 'वर्ल्ड वेट लिफ्टिंग चैम्पियनशिप' स्पर्द्धा में मीराबाई चानू ने अपने दृढ़ संकल्प से अतीत की दु:खद घटना को भूलकर शक्ति प्रदर्शित कर स्वर्ण पदक प्राप्त किया। यहाँ तक कि इस प्रतियोगिता में सफलता प्राप्त करने के लिए मीराबाई चानू अपनी प्रिय बहिन के विवाह समारोह में भी सम्मिलित नहीं हो सकी। भारोत्तोलन क्षेत्र में प्रतिष्ठिता मीराबाई 2018 ई. में नारीशक्ति के प्रतीक रूप में अपनी पहचान बना चुकी थी। इस वर्ष भी मीराबाई चानू ने अपना चमत्कृत कर देने वाली भारोत्तोलन क्षमता से 'कॉमनवेल्थ गेम्स' में स्वर्ण पदक जीतकर राष्ट्र में कीर्तिकौमुदी का प्रसार किया। इस अभूतपूर्व विजय से गौरवान्वित मणिपुर के मुख्यमंत्री द्वारा 'मीराबाई चानू' को प्रभूत धनराशि से पुरस्कृत किया गया। 2018 में ही भारत के राष्ट्रपति 'रामनाथ कोविंद' महोदय के द्वारा 'मीराबाई चानू' राष्ट्र के दुर्लभ '**पद्मश्री**' पुरस्कार से सम्मानित हुई। मीरा के सौभाग्यरूप में फलित इस वर्ष में ही 'मीराबाई चानू' को क्रीड़ाक्षेत्र में राष्ट्र के सर्वोच्च सम्मान '**राजीव गाँधी खेल पुरस्कार**' से सम्मानित किया गया। हाल ही में 'टोक्यो ओलम्पिक 2020' की भारोत्तोलन प्रतियोगिता में 49 किलोग्राम वजन उठाकर मीराबाई ने विश्व में विजय पताका फहराई है। मीराबाई चानू के अकल्पनीय प्रदर्शन से गौरवान्वित भारत के प्रधानमंत्री के प्रशंसा वचन यहाँ उल्लेखित हैं- 'हमें ही नहीं बल्कि देश के सभी लोगों को मीराबाई चानू के ऊपर गर्व है। मीराबाई चानू ने वह कर दिखाया है जो कि आज तक किसी महिला ने नहीं किया है। शक्तिरूपिणी मीराबाई चानू निश्चय ही राष्ट्र की प्रेरणा स्रोत है।'

**पूर्वसंस्कृतविभागाध्यक्ष,**
**लालबहादुरशास्त्री कॉलेज, जयपुर**

---

**पाठक प्रतिक्रिया**

## 'नवनीतचौर्यलीला' रोचते नाट्यकाव्यम्

❑ **पं. नथमलशास्त्री दाधीचः**

**गोपाङ्गनानां नवनीतचौरं कृष्णं परं ब्रह्म निगूढरूपम्।**
**गोपालबालं पठ पत्रिकायामानन्दमग्नो भव हे सखे! त्वम्।।१।।**
**अञ्जनाविदुषी धन्या संस्कृता कृष्णमानसा।**
**गोपीप्रेमपरां लीलां नाट्यकाव्येऽसृजच्चया।।२।।**
**काव्यं चारुतरं नाट्यं हास्यवात्सल्य भावितम्।**
**कृष्णलीलामृतं भक्त्या रोचतेऽद्भुतदर्शनम्।।३।।**
**।। वर्द्धन्तां नःपदक्रमाः।।**

**( पूर्वप्राध्यापकः ).**
**छापरः**
**मो. 9351226660**

आयुर्वेदस्तम्भः

# वर्षर्तौ पित्तस्यापनयनं श्रेयस्करम्

❑ प्रो. वैद्यः बनवारीलालगौडः
( म.म. राष्ट्रपतिसम्मानितः ) पूर्वकुलपतिः

**भारतवर्षे ऋतुरूपेण कालस्य सम्यग्विभागो वर्तते । शीतोष्णवर्षलक्षणाश्चैते ऋतवः शरीरेष्वोषधीषु च स्वप्रभावं प्रदर्शयन्ति । चन्द्रादित्ययोः कालविभागकरत्वादयने द्वे भवतो दक्षिणमुत्तरं च। तत्र दक्षिणमयनं चन्द्रकालं विभागयति, उत्तरमयनमादित्यकालञ्च विभागयति। तयोर्दक्षिणमयनन्तु वर्षाशरद्धेमन्तात्मकम्भवति; वर्षादिषु तु भगवानाप्यायते सोमः, यतो हि भवत्यधिकबलो भगवाँश्चन्द्रः कालेऽस्मिन् । तेन ह्यम्ललवणमधुराश्च रसा बलवन्तो भवन्ति, ऋतुष्वेतेषु वर्षादिषु च रसानामेतेषामुपभोक्तॄणां सर्वप्राणिनां बलमभिवर्धते।**

भारतवर्ष में ऋतुओं के रूप में काल का सम्यक् विभाग है । शीत, उष्ण एवं वर्षा के लक्षणों वाली ये ऋतुएं शरीरों में एवं औषधियों में अपने प्रभाव को प्रदर्शित करती हैं । चन्द्रमा एवं सूर्य के काल का विभाग करने वाला होने के कारण दो अयन होते हैं- उत्तर एवं दक्षिण । इनमें दक्षिणायन चन्द्रकाल को विभक्त करता है एवं उत्तरायण आदित्य काल को विभक्त करता है । इन दोनों में दक्षिणायन तो वर्षा, शरद् और हेमन्त ऋतु वाला होता है । वर्षा इत्यादि में तो भगवान् चन्द्रमा आप्यायन करते हैं ( वर्धित करते हैं) । क्योंकि इस काल में भगवान् चन्द्र अत्यधिक बलवाले होते हैं, उसके कारण (वनस्पतियों में, औषधियों में)अम्ल, लवण और मधुर रस बलवान् हो जाते हैं । इन वर्षादि ऋतुओं में ( औषधियों में होने वाले) रसों का और उपभोग करने वाले संपूर्ण प्राणियों का बल बढ़ता है।

**अनादिमध्यनिधनः स्वयम्भुः भगवान् कालोऽक्षिनिमेषकाष्ठाकलामुहूर्ताहोरात्रपक्षमासर्त्वयन-संवत्सरयुगप्रविभागयुक्तो भवति । एकस्मिन् संवत्सरे तु माघादयो द्वादशमासाः, द्विमासिकमृतुं कृत्वा षडृतवश्च भवन्ति; ते ऋतवस्तु शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्तात्मका भवन्ति तथा दोषोपचयप्रकोपोपशमनिमित्ता अपि निर्दिष्टाः ।**

जिसका आदि मध्य एवं अन्त नहीं है ऐसे स्वयंभू भगवान् काल अक्षिनिमेष,काष्ठा, कला, मुहूर्त, अहोरात्र, पक्ष, मास, ऋतु, अयन, संवत्सर एवं युगप्रविभाग से युक्त होते हैं । एक संवत्सर ( वर्ष ) में तो माघ इत्यादि 12 मास होते हैं । एक एक ऋतु को दो दो माह की करके (मानकर) छः ऋतुएं होती हैं । वे ऋतुएं तो शिशिर, वसन्त, ग्रीष्म, वर्षा, शरद्, हेमन्तात्मक होती हैं तथा दोषों के उपचय (इकट्ठा होना, सञ्चय ), प्रकोप और उपशम ( शान्त होने ) के निमित्त भी कही गई हैं ।

**मासात्मकः विभागस्तु निम्नानुसारी भवति, यथा-**

**तपस्तपस्यौ ( तपः माघः, तपस्यः फाल्गुनः ) शिशिरः, मधुमाधवौ ( मधुः चैत्रः, माधवः वैशाखः ) वसन्तः, शुचिशुक्रौ ( शुचिः ज्येष्ठः, शुक्रः आषाढः, अन्ये तु शुक्रो ज्येष्ठः, शुचिराषाढ इति मन्यन्ते ) ग्रीष्मः, नभोनभस्यौ ( नभः श्रावणः, नभस्यः भाद्रपदः ) वर्षाः, इषोर्जौ ( इषः आश्विनः, ऊर्जः कार्तिकः ) शरत्, सहः सहस्यौ ( सहः मार्गशीर्षः, सहस्यः पौषः ) हेमन्त इति ।। केचिदाचार्याः व्याख्यायन्ति- गङ्गाया दक्षिणे देशे वर्षाद्यृतुविभागो ज्ञातव्य इति; वस्तुतस्त्वेषःशिशिरादिविभागो रसबलनिष्पत्त्यर्थं दर्शितः। यो ह्यग्रे वक्ष्यमाणो वर्षाद्यृतुविभागः संशोधनमधिकृत्य कृतस्तत्र तु**

**दोषाणां संशमनं निर्हरणञ्चेच्छन्त्याचार्याः ।**

मासात्मक (मासस्वरूपक) विभाग तो निम्नानुसार होता है-

जैसे माघ एवं फाल्गुन शिशिर, चैत्र एवं वैशाख वसन्त, ज्येष्ठ एवं आषाढ़ ग्रीष्म, श्रावण एवं भाद्रपद वर्षा, आश्विन एवं कार्तिक शरद् ऋतु तथा मार्गशीर्ष एवं पौष माह हेमन्त ऋतु वाले होते हैं । कुछ आचार्य व्याख्यान करते हैं (कहते हैं) कि गङ्गा के दक्षिण प्रदेश में वर्षादि ऋ तुविभाग जानना चाहिए । वस्तुत: तो यह शिशिरादिविभाग औषधियों के रस एवं शरीर के बल की उत्पन्न होने की दृष्टि से बताया गया है, जो आगे कहा जाने वाला वर्षादि ऋतुविभाग संशोधन को ध्यान में रखकर किया गया है, वहाँ तो आचार्य दोषों का संशमन और निर्हरण चाहते हैं ।

**प्रावृड्वर्षयोः को भेदः? उच्यते, प्रथमः प्रवृष्टेः कालः प्रावृड्, तस्यानुबन्धो वर्षाः। सञ्चयात्प्रकोपो बलवान्, तस्य चिकित्सितं संशोधनमित्यत्र वर्षादय ऋतव उक्ताः । वर्षाशरद्धेमन्त-वसन्तग्रीष्मप्रावृषः षड्तवो भवन्ति, दोषोपचयप्रकोपोपशमनिमित्तं; ते तु भाद्रपदाद्येन द्विमासिकेन व्याख्याताः; तद्यथा- भाद्रपदाश्वयुजौ वर्षाः, कार्तिकमार्गशीर्षौ शरत्, पौषमाघौ हेमन्तः, फाल्गुनचैत्रौ वसन्तः, वैशाखज्येष्ठौ ग्रीष्मः; आषाढश्रावणौ प्रावृडिति ।**

प्रावृट् एवं वर्षा में क्या भेद है? प्रथम प्रवृष्टि (वर्षा) का काल प्रावृट् होता है और उसका अनुबन्ध वर्षा है । सञ्चय से प्रकोप बलवान् होता है उसकी चिकित्सा संशोधन है । इसलिए यहाँ पर वर्षादि ऋतुएं कही गई हैं। वर्षा, शरद्, हेमन्त, वसन्त, ग्रीष्म एवं प्रावृट् ये छः ऋतुएं होती हैं, जोकि दोषों के उपचय और प्रकोप के निमित्त कही गई हैं वे तो भाद्रपद इत्यादि दो दो महीनों से व्याख्यात हैं, जैसे- भाद्रपद एवं आश्विन वर्षा होती है, कार्तिक एवं मार्गशीर्ष शरद् है, पौष एवं माघ हेमन्त है, फाल्गुन एवं चैत्र वसन्त है, वैशाख एवं ज्येष्ठ ग्रीष्म है तथा आषाढ़ और श्रावण प्रावृट् है।

**किन्त्वेतच्चिन्तनन्तु सामान्यैर्जनैर्न कर्तव्यम् । एषः विभागस्तु दोषसञ्चयादिनिमित्तो वर्ततेऽत एव भिषग्भिरेव चिन्तनीयः । ऋतवस्तु वर्षादयः संशोधनमधिकृत्य कथिताः । एषः विभागः सञ्चयाद्यर्थ इति तात्पर्यम् ।**

किंतु यह चिंतन तो सामान्य व्यक्तियों के द्वारा नहीं किया जाना चाहिए । यह विभाग तो दोषसञ्चय इत्यादि के निमित्त है, इसलिए वैद्यों के द्वारा ही चिंतन करने योग्य है । वर्षा इत्यादि ऋतुएं तो संशोधन को अधिकृत करके कही गई हैं। यह विभाग सञ्चय इत्यादि के लिए है, इसका यह तात्पर्य है।

**वर्षादिषु संशोधनं कार्यम् । शिशिरादयस्तु रसं बलं चाधिकृत्योक्ताः, अत एव शिशिरादिषु यथावश्यक-रूपेण चिकित्सकैः प्रशमनं विधीयते , वर्षादिविभाजने तु तैरेवोपयुक्तेषु कथितेषु मासेषु चैत्रश्रावणमार्गशीर्षेषु शोधनमपि चिकित्सकैरेव विधीयते। वर्षास्वोषधयस्तरुण्योऽल्पवीर्या आपश्चाप्रशान्ताः क्षितिमलप्रायाः भवन्ति। ता उपयुज्यमाना नभसि मेघावतते जलप्रक्लिन्नायां भूमौ क्लिन्नदेहानां प्राणिनां शीतवातविष्टम्भिताग्नीनां विदह्यन्ते, तद्विदाहात्पित्तसञ्चयो भवति।**

वर्षादि में संशोधन करना चाहिए । शिशिरादि तो रस और बल को अधिकृत कर के कहे गए हैं । इसलिए शिशिर इत्यादि में यथावश्यक रूप से चिकित्सकों के द्वारा प्रशमन किया जाता है। वर्षादि विभाजन में तो उनके द्वारा ही कहे गए उपयुक्त महीनों में चैत्र, श्रावण, मार्गशीर्ष में शोधन भी चिकित्सकों के द्वारा ही किया जाता है । वर्षा में औषधियां तरुण (अपरिपक्व) एवं अल्प वीर्य वाली होती हैं और जल पृथ्वी के मल से युक्त होता है अतः अप्रशान्त (कलुषित) होता है। प्रयुक्त किया जाता हुआ

वह जल आकाश के मेघाच्छन्न होने पर तथा पृथ्वी के वृष्टि के जल से गीली हो जाने के कारण क्लिन्न (गीली) देह वाले तथा शीत से कुपित वात से विनष्ट पाचकाग्नि वाले व्यक्तियों के विदाह करता है। उस विदाह से पित्त सञ्चय होता है ।

**सः सञ्चयः शरदि प्रविरलमेघे वियत्युपशुष्यति पङ्केऽर्ककिरणप्रविलायितः पैत्तिकान् व्याधीञ्जनयति। वर्षाकाले त्वेभिरेव कारणैः पित्तस्य सञ्चयो भवत्यत एव संशोधनमधिकृत्य कथिते वर्षाकाले शिशिरादिविभाजनानुसार्येव दोषप्रशमनं कार्यम्। चैत्रश्रावणमार्गशीर्षेषु तु क्रमशः कफस्य वातस्य पित्तस्य च संशोधनमाध्यमेन निर्हरणङ्करणीयम्, एतदर्थन्तु क्रमशः वमनस्य बस्तेर्विरेचनस्य च प्रयोगो विधेयः। संशमनन्तु क्रमशः हेमन्ते वसन्ते च कफस्य, वर्षासु शरदि च पित्तस्य, ग्रीष्मे वर्षासु च वातस्य करणीयमस्ति।**

शरद् ऋतु में आकाश में मेघों के अल्प हो जाने पर और (पृथ्वी के) कीचड़ के शुष्क हो जाने पर सूर्य की किरणों से द्रवित वह सञ्चय (पित्त का वह सञ्चय) पैत्तिक व्याधियों को उत्पन्न करता है ।

वर्षाकाल में तो इन कारणों से पित्त का सञ्चय होता है। इसलिए संशोधन को ध्यान में रखकर कहे गए वर्षाकाल में शिशिर इत्यादि के विभाजन के अनुसार ही दोष का प्रशमन करना चाहिए । चैत्र, श्रावण एवं मार्गशीर्ष महीनों में तो क्रमशः कफ का, वात का एवं पित्त का संशोधन के माध्यम से निर्हरण करना चाहिए । इसके लिए तो क्रमशः वमन का, बस्ति का और विरेचन का प्रयोग करना चाहिए । संशमन तो क्रमशः हेमन्त में और वसन्त में कफ का, वर्षा एवं शरद् ऋतु में पित्त का तथा ग्रीष्म एवं वर्षा ऋतु में वात का करने योग्य होता है।

**यतो हि कालप्रभावात्तदनुरूपाहारविहारसेवनाच्च ग्रीष्मे समीरणः चीयते, वर्षासु पित्तं चयं याति, कफश्च वसन्ते चीयते। अत एव तस्मिंस्तस्मिन् काले तत्तद्दोषापहारकाणामाहार-विहाराणां विशिष्टानाञ्चौषधयोगानां प्रयोगः करणीयः। तेन हि स्वेऽनुकूले काले सः विशिष्टः दोषः सञ्चयमेव नावाप्यते। यतो हि सञ्चयेऽपहृताः दोषाः नोत्तरागतीः लभन्ते, ते तूत्तरासु गतिषु बलवत्तराः भवन्ति। अत एव यथाबलं यथादोषञ्च तेषामपहरणङ्करणीयम्, तत्तु बहुदोषे शोधनं, मध्यदोषे लङ्घनपाचनम्, अल्पदोषे संशमनमिति करणीयम्।**

क्योंकि काल के प्रभाव से उसके (काल के) अनुरूप आहार एवं विहार का सेवन करने से ग्रीष्म ऋतु में वायु सञ्चित होती है, वर्षा में पित्त चय को प्राप्त होता है और कफ वसन्त ऋतु में सञ्चित होता है । इसलिए उस-उस काल में उस-उस दोषविशेष का अपहरण करने वाले आहार-विहार का और विशिष्ट औषधयोगों का प्रयोग करना चाहिए । उस से निश्चित रूप से अपने अनुकूल काल में वह विशिष्ट दोष सञ्चय को ही प्राप्त नहीं करता है, क्योंकि सञ्चय में अपहृत (दूर किए गए) दोष उत्तर गतियों को (बाद में होने वाली गतियों को, प्रकोप-प्रसर-स्थानसंश्रय-व्यक्ति एवं भेद स्वरूप गतियों को) प्राप्त नहीं करते हैं , वे (दोष) तो उत्तर (बाद में होने वाली) गतियों में विशेष रूप से बलवान् होते हैं । इसलिए दोष का जैसा बल हो उसके अनुसार और जो दोष सञ्चित हो उसके अनुसार इन दोषों का अपहरण करना चाहिए। यह अपहरण तो अधिक दोष में शोधन, मध्य दोष यदि है तो लंघन और पाचन तथा अल्प दोष यदि है तो उसमें संशमन करना चाहिए ।

**उपर्युक्तं ह्येतत्सैद्धान्तिकं वर्णनमाचार्योपदेशानुसार्येव विहितमत्र तु प्रसङ्गोपात्तस्य कालानुसारिणः पित्तस्यापहारकाणां निरापदस्वरूपात्मकानां केषाञ्चिद्योगानामुल्लेखः क्रियते-**

1. फलत्रिकादिक्वाथः-

**वर्षर्तौः मध्यम उत्तरे वा काले फलत्रिकादिक्काथस्य प्रयोग:श्रेष्ठो भवति, यतो हि वर्षासु कालप्रभावात् पित्तस्य सञ्चयो भवति, कालेऽस्मिन् प्रयुक्तः फलत्रिकादिक्काथः सञ्चितस्य स्वल्पमात्रस्यापि पित्तस्यापाकरणं करोति ज्वरच्छर्दयम्ल-पित्तादीनाञ्च रोगाणां निवारणं करोति। क्काथश्चायं भैषज्यरत्नावल्यां समुल्लिखितो वर्तते। यथा हि-**

**फलत्रिकं पटोलञ्च तिक्ताक्काथः सितायुतः।**

**पीतः क्लीतकमध्वाक्तो ज्वरच्छर्दयम्लपित्तजित्॥**

**( भै.र.अम्लपित्तरोगाधिकारः )**

यह उपर्युक्त सैद्धांतिक वर्णन आचार्य के उपदेश के अनुसार ही किया गया है यहाँ तो प्रसंग के अनुसार प्राप्त काल के अनुसार सञ्चित होने वाले पित्त का अपहरण करने वाले निरापद स्वरूप वाले कुछ योगों का उल्लेख किया जा रहा है ।

**फलत्रिकादिक्काथः-**

वर्षा ऋतु के मध्यम या उत्तरकाल में फलत्रिकादिक्काथ का प्रयोग श्रेष्ठ होता है, क्योंकि वर्षा में काल के प्रभाव से पित्त का सञ्चय होता है, इस काल में प्रयुक्त फलत्रिकादिक्काथ सञ्चित स्वल्पमात्र भी पित्त को दूर करता है। ज्वरच्छर्दि, अम्लपित्तादि रोगों को दूर करता है। यह क्काथ भैषज्यरत्नावली में उल्लिखित है। यथा-

त्रिफला, पटोलपत्र, कुटकी इन तीनों का क्काथ मिश्री मिला कर तथा मुलहठी एवं शहद मिला कर पिलाने से यह ज्वर-च्छर्दि एवं अम्लपित्त को जीतता है॥

(भै.र.अम्लपित्तरोगाधिकार:)

**कट्वी तु कटुका तिक्ता भवत्यतितिक्ताऽत एव तत्संयोगात्क्काथोऽयमतितिक्तो भवत्यरुचिकरो हि पाने। यदि चेद्दृढेच्छाशक्तिसम्पन्नाः जनाः गृह्णीयुः येन केन प्रकारेण वर्षाकाले केवलं पञ्च दिनानि यावत्तर्हि ते पित्तेन सम्पीडिताः न भवन्ति, पित्तजाश्च रोगाः शरत्काले न जायन्ते हेतून्मूलनात्।**

कट्वी नाम से प्रसिद्ध यह तिक्त रसवाली कटुका (कुटकी) अत्यधिक कड़वी होती है, इसलिए इसके संयोग से यह क्काथ अत्यधिक कड़वा होता है और पीने में भी अरुचिकर होता है, यदि दृढ़ इच्छाशक्ति से युक्त व्यक्ति इसको वर्षाकाल में केवल 5 दिन तक येन केन प्रकारेण ग्रहण करते हैं (पीते हैं) तो वे पित्तदोष से पीड़ित नहीं होते हैं और रोगोत्पत्ति करने वाले हेतु का उन्मूलन हो जाने से पित्त से उत्पन्न होने वाले रोग शरद् ऋतु में उत्पन्न नहीं होते हैं ।

**पित्तप्रमाथी हिमकषायः-**

**पञ्चग्रामपरिमितानि संशुष्काणि मार्कण्डीपत्राणि ग्रामत्रयपरिमिताञ्च क्षुण्णां मञ्जिष्ठां गृहीत्वा 500 मि.लि.परिमिते जले क्षिप्त्वा तस्मिन्नेव जले पिण्डखर्जूरषोडशीं निक्षिप्य पिधाय च पात्रं सम्यङ्निधापयेत्। अर्धहोरानन्तरञ्च किञ्चिद्वि-मर्दय रात्रौ न्यसेत्। प्रातर्निष्कम्पमास्राव्य तदम्बु परिशीलयेत्। पाण्डुपित्तास्रकण्डूतिज्वरघ्नश्चैषः हिमकषायः पित्तप्रमाथी वर्तते। वर्षर्तावस्य सेवनेन विकृतस्य पित्तस्य निर्हरणं मृदुविरेचनमाध्यमेन भवति। अस्य सेवनन्तु पञ्चदिनानि यावदेव पर्याप्तमस्ति। ये जनाः स्वस्थाः सन्ति ते तु निरापदस्वरूपात्मकस्यास्य प्रयोगं कुर्युः। ये हि पाण्डुकामलापित्तास्रकण्डूतिज्वरादिपीडिताः सन्ति तेष्वप्ययं लाभप्रदोऽस्ति। किन्तु तैस्त्वस्य प्रयोगो वैद्यनिर्देशेनैव करणीयः।**

पित्तप्रमाथी हिमकषाय-

पाँच ग्राम की मात्रा में सूखे हुए सनाय के पत्ते और 3 ग्राम की मात्रा में टुकड़े की हुई मञ्जिष्ठा को लेकर 500 मिलीलीटर पानी में डालकर उसी जल में सोलह पिण्डखजूर डालकर पात्र को ढककर अच्छी प्रकार से रख

देना चाहिए। आधा घंटे के बाद उसको कुछ मसलकर रात्रि में रख दे, प्रात:काल विना हिलाए उस पानी को छानकर पीना चाहिए। पाण्डु, पित्तविकृति, रक्तविकृति, कण्डू और ज्वर को नष्ट करने वाला यह हिमकषाय पित्त को विनाश करने वाला होता है। वर्षा ऋतु में इसके सेवन से विकृत पित्त का निर्हरण मृदु विरेचन के माध्यम से हो जाता है। इसका सेवन तो 5 दिन तक ही कर लेना पर्याप्त होता है। जो लोग स्वस्थ हैं उन्हें तो निरापद स्वरूप के इस हिमकषाय का प्रयोग करना चाहिए। जो लोग पाण्डु, कामला, रक्तपित्त या पित्त एवं रक्तरोग, ज्वर इत्यादि से पीड़ित होते हैं, उनमें भी यह लाभप्रद है। किन्तु उनके द्वारा तो इसका प्रयोग वैद्य के निर्देश से ही करना चाहिए।

**खर्जूरादिमन्थ:-**

**त्रीणि पिण्डखर्जूरफलानि, दश द्राक्षाफलानि दाडिमबीजान्यार्द्राणि 50 ग्रामपरिमितानि, परुषकफलानि तु 30 ग्रामपरिमितानि गृहीत्वा 500 मि.लि.परिमिते जले क्षिप्त्वा पात्रं सम्यङ्निधापयेत्, होरानन्तरन्तु सम्यग्विमर्द्य वस्त्रेण पूतं तज्जलं पिबेत्। यदि जलेऽस्मिन् गुलाबगुलकन्दनामकस्य सुनिर्मितस्य योगस्यापि 10 ग्रामपरिमितस्य सम्मिश्रणम्भवेत्तर्हि सुस्वादुतामवाप्याधिकगुणयुक्त: तुष्टिद: पुष्टिद: सन्तर्पणात्मक: दाहप्रशमनकारक: तृष्णापहारक: तापापवारक: ज्वरनिवारक: सुशीत: पित्तप्रशामकोऽयं मन्थ: निराकरोति पित्तम्।**

खर्जूरादि मन्थ –

तीन पिण्डखजूर के फल, 10 मुनक्का (द्राक्षाफल) एवं ताजा 50 ग्राम दाड़िम के बीज (दाने) तथा फालसे के फल 30 ग्राम लेकर 500 मिलीलीटर पानी में डालकर पात्र को अच्छी प्रकार से रख देना चाहिए 1 घंटे के बाद तो उसको अच्छी प्रकार से मसल कर वस्त्र से छानकर उस जल को पीना चाहिए। यदि इस जल में गुलाबगुलकंद नामक अच्छी प्रकार से बने हुए योग का भी 10 ग्राम की मात्रा में सम्मिश्रण कर दिया जाता है तो अच्छे स्वाद को प्राप्त कर यह अधिक गुणों से युक्त योग (मन्थ) पुष्टि प्रदान करने वाला, पुष्टि प्रदान करने वाला, सन्तर्पण स्वरूप वाला, दाह का प्रशमन करने वाला, तृष्णा (प्यास) को दूर करने वाला, ताप को दूर करने वाला (अपवारण करने वाला, रक्षा करने वाला), ज्वर को निवृत्त करने वाला (दूर करने वाला, नष्ट करने वाला) शीतल, पित्त का प्रशमन करने वाला यह मन्थ पित्त को दूर करता है।

**यद्यपि वर्षाकाले उदमन्थो ( उदकप्रधानो मन्थो ) निषिद्धोऽस्ति तर्ह्यप्यस्य मन्थस्य निषिद्धता नास्ति, यो ह्युदकप्रधान: सक्तुयुक्तो मन्थो भवति स तु निषिद्धोऽस्ति वर्षाकाले (उदमन्थं दिवास्वप्नमवश्यायं नदीजलम्...... वर्जयेत्- चरकसंहिता )।**

यद्यपि वर्षाकाल में जिसमें अधिक जल हो इस प्रकार का मन्थ निषिद्ध है फिर भी इस मन्थ की निषिद्धता नहीं है क्योंकि जो सत्तू से युक्त तथा अधिक जल वाला मन्थ होता है वह वर्षाकाल में निषिद्ध है (उदमन्थ, दिवास्वप्न और ओस एवं नदी जल को वर्जित किया जाना चाहिए)।

**यो ह्युपर्युक्तानां क्वाथ-हिमकषाय-खर्जूरादिमन्थानां विधिविहितं सेवनङ्करोति स वर्षाकाले पित्तेन पीडितो न भवति, शरदि च पित्तजान् रोगान्नैवावाप्नोति। अस्मादेव हि कारणाद् ''वर्षर्तौ पित्तस्यापनयनं श्रेयस्करम्'' भवति।**

जो उपर्युक्त क्वाथ, हिमकषाय एवं खर्जूरादिमन्थ का विधिपूर्व कही गई विधि के अनुसार सेवन करता है वह वर्षाकाल में पित्त से पीड़ित नहीं होता है और शरद् ऋतु में पित्त से उत्पन्न होने वाले रोगों को प्राप्त नहीं करता है इसी कारण से वर्षा ऋतु में पित्तापनयन श्रेष्ठ होता है।

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनों सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

## एस्बेस्टोस सीमेन्ट शीट्स

## छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाडा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

# राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
## पाञ्चजन्य

(English) Weekly
## ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



**You can subscribe Panchjanya/Organiser Weeklies online through our Websites : www.panchjanya.com, www.organiser.org**

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/-पाञ्चजन्य • 800/-ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**
**भारत प्रकाशन (दिल्ली) लिमिटेड**
**2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली-110055**
**फोन : 011-47642000, 01, 02, ई-मेल: circ@bpdl.in**

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७१०१४

प्रतिष्ठायाम्,